10 ^{a}) T3 त्वाश्रयम् Ś1 Ñ2 V1 B D1–3 6 आगत्य(B1 °म्य) चाश्रम(D3 °म [sic])द्वार, M4 अगत्वा चाश्रमद्वारि (sic) —^{b}) B2 मुनिदर्शन- Ś1 Ñ2 V1 B D1–3 6 M4 -काङ्क्षया (for -काङ्क्षिणौ) —^{cd}) M3 सीताया (sic) (for सीतया) Ś1 Ñ2 V1 B D1–3 6 M4 तस्थौ रामः सह श्रीमान्सीतया लक्ष्मणेन च —For 9–10, D4 5 7 subst , Dg1 Dt1 Dd1 Dm1 T G M1–3 ins after 10

1132* स प्रविश्य महात्मानमृषिं शिष्यगणैर्वृतम् ।
संशितव्रतमेकाग्रं तपसा लब्धचक्षुषम् ।

[(l 1) Dm1 T3 G1 Ck सम्प्रविश्य, Cr m g t as above D4 5 7 तस्मिंस्तीर्थे महाभागम् (for the prior half) T3 सवगणैर् (for शिष्य°) D4 7 G1 (before corr) युत (for वृतम्) —(l 2) D4 5 7 शंसित- (for संशित) Cr लब्धचक्षुषा]
—After 10, Ś1 Ñ2 V1 B D1–3 6 M4 ins

1133* तौ विदित्वागतौ चापि भ्रातरौ रामलक्ष्मणौ ।
प्रवेशयामास मुनिः स्वमाश्रमपदं तदा ।

[(l 1) M4 मुनिश् (for [आ]गतौ) V1 [अ]थ (for [अ]पि) D6 om राम —D1 om l 2 —(l 2) M4 पुनः (for मुनिः), B2 D3 तथा]

11 ^{a}) B1 हुत्वाग्निहोत्रम्, G(ed) कृताग्नि° Ś1 Ñ2 V1 B D2 3 6 M4 आसीनं, D4 5 7 तं दृष्ट्वा, G1 दृष्ट्वा च (for दृष्ट्वैव) —^{b}) B4 Dt1 Dd1 Dm1 महाभाग D7 G1 कृताजलिं —^{d}) D4 5 7 [अ]प्यु(D5 [अ]भ्यु, D7 [अ]नु [sic]) पागमत् (for [अ]भ्यवादयत्) —After 11, Ś1 Ñ2 V1 B D2 3 6 M4 read 17

12 ^{a}) V1 निवेदयत (sic), Dg1 मन्यवेदयच , M4 मवे° (for न्यवेदयत) —^{b}) D5 -पूर्वज —^{d}) Ś1 Ñ2 V1 B D2 3 6 M4 भ्रातरौ (for भगवन्) —For 11–12, D1 subst

1134* उवाच मुनिशार्दूलो राघवं सहलक्ष्मणम् ।
किमागमनकृत्यं नो मुनिवेषधरौ कथम् ।
कथं च सीतासहितौ राजचिह्नविवर्जितौ ।
तस्यैवं वचनं श्रुत्वा भरद्वाजस्य राघवः ।
उवाच प्रसृतो वाक्यं वनागमनकारणम् । [5]
पितृवाक्येन भगवन्कैकेय्या प्रियकाम्यया ।
राज्यभोगान्प्रियांस्त्यक्त्वा वनवासाय निर्गतः ।

13 ^{ab}) D1 मामेव (for ममेय) Ś1 Dg1 Dt1 Dd1 Dm1 D4–7 कल्याणी वैदेही (by transp) B2 सीता जनकनंदिनी (for ^{b}) —^{c}) Ś1 V1 D1–3 6 M4 मामनुव्रजमानेयं, Ñ2 B अनुव्रजती मामेव(B4 °व), D4 मया सार्धं तु विजनं, D5 7 ममानु विप्र विजनं —^{d}) Ś1 Ñ2 V1 B D1–7 M4 उपागता(V1 °त [sic]) (for अनिन्दिता)

14 ^{a}) Dt1 Dd1 D2 G2 M3 प्र(D2 प्रा)व्रजमान, D6 प्रव्राज्य . . (damaged) (for प्रव्राज्यमान) D3 मा —^{b}) Ś1 Ñ2 V1 B D1–4 6 7 चानुज (for अनुज) —^{c}) Ś1 Ñ2 B1–3 D4 6 7 स्वयम् (for अयम्) Ñ2 Dg1 T1 M3 अन्वा (Ñ2 °नु)गमद्, V1 ममानुज-, D2 मम सह (for अन्वगमद्) —^{d}) M2 वयम् (for वनम्) Ś1 D4 6 7 एष, M2 एव (for एव) Dt1 Dd1 Dm1 धृतव्रत , D3 दृढव्रत, M2 दृढव्रता

15 ^{a}) Ś1 V1 B D1–7 T1 नि(D5 [अ]नु)युक्तो, M4 नियुक्तौ (for नियुक्ता) —^{b}) Dg1 Dt1 प्रवेक्ष्याम (for °मस्). Ś1 Ñ2 V1 B D1–7 प्रवेक्ष्या(V1 D2 °क्षा [sic])मि महा (Ś1 D4–7 °हद्)वन, M4 भ्रातरौ रामलक्ष्मणौ (cf the post. half of l 1 of 1133*) —^{c}) Ś1 Ñ2 V1 B2 4 D1 4–7 चरिष्यामि, Dg1 T1 3 G M1 3 चरिष्यामस्, D2 3 M4 [आ]चरिष्यामि(M4 °वस्) (for [आ]चरिष्यामस्) —^{d}) Ś1

तस्य तद्वचनं श्रुत्वा राजपुत्रस्य धीमतः ।
उपानयत धर्मात्मा गामर्घ्यमुदकं ततः ॥ १६
मृगपक्षिभिरासीनो मुनिभिश्च समन्ततः ।
राममागतमभ्यर्च्य स्वागतेनाह तं मुनिः ॥ १७
प्रतिगृह्य च तामर्चामुपविष्टं स राघवम् ।
भरद्वाजोऽब्रवीद्वाक्यं धर्मयुक्तमिदं तदा ॥ १८
चिरस्य खलु काकुत्स्थ पश्यामि त्वामिहागतम् ।
श्रुतं तव मया चेदं विवासनमकारणम् ॥ १९
अवकाशो विविक्तोऽयं महानद्योः समागमे ।
पुण्यश्च रमणीयश्च वसत्विह भवान्सुखम् ॥ २०
एवमुक्तस्तु वचनं भरद्वाजेन राघवः ।
प्रत्युवाच शुभं वाक्यं रामः सर्वहिते रतः ॥ २१

D1 6 G1 2 M1 पत्र- Ñ2 B1 3 वन्य-, Dm1 (before corr as in text) D4 (after corr *sec m* marg) कन्द-, D5 7 यत्र (for तत्र) Ś1 V1 B D1–7 -फलाशन (D4 °न), Dm1 G2 M1 -फलाशिन (Dm1 °ना [sic]), M4 फलाशिनौ

16 ^{c}) V1 उपानयन्म —^{d}) D2 सर्वम् Ñ2 V1 B D1 2 M4 तथा (for ततः) Ś1 D4–7 रामायार्घ्यमुपानयत् —After 16, Ś1 Ñ2 V1 B D1 2 4–7 M4 ins

1135* प्रतिगृह्य च काकुत्स्थमात्मनेनोदकेन च ।
न्यमन्त्रयत मूलैश्च फलैश्च फलभोजन ।

[(l 1) D1 2 परिगृह्य D4 5 7 तु (for च) —(l 2) D2 lacuna for मूलैश्च D2 मूलैश्च (for फलैश्च) Ś1 B2 D4–7 -भोजि (B2 D6 7 °न)न (D7 °नि [sic]) (for -भोजन)],

while Dg1 Dt1 Dd1 Dm1 T G M1–3 ins after 16

1136* नानाविधान्वन्यमूलफलाश्रयान् ।
तेभ्यो ददौ ततस्तपा वासं चैवाभ्यकल्पयत् ।

[(l 1) Dd1 वन- (for वन्य-) G2 -[आ]श्रयान् —(l 2) Dg1 G2 M1 3 [अ]नि T2 3 M2 [अ]नु-, G1 [अ]नि- (sic) (for [अ]भि)]

17 D1 4 5 7 om 17 Ś1 Ñ2 V1 B D2 3 6 M4 read 17 after 11. —^{a}) Ś1 Ñ2 V1 B D2 3 6 M4 आसीनः (for °नो) —^{b}) Ś1 Ñ2 V1 B D2 3 6 M4 वृतो मुनिभिश्च च —^{c}) T1 आनर्च, M4 अभ्यर्च्य, Ck as in text (for अभ्यर्च्य) —^{d}) Dd1 Dm1 G2 M1 3 Ct [आ]गत मुनि, T1 2 M2 [अ]नितः मुनि, G1 [अ]पि न मुनि, G2 महामुनि, Cg as in text (for [आ]ह त मुनि) Ś1 V1 D2 3 6 M4 सौम्य-मापत वै मुनि, Ñ2 B सौम्यनन्दन (B2 स ननन्द च) न मुनिं, Dt1 स्वागत तु महामुनि

18 ^{a}) B1 प्रतिग्राह्य (for °गृह्य) Ś1 B1 Dt1 Dd1 Dm1 D4–7 तु (for च) Ś1 Ñ2 B2 D4–7 ता पूजाम्, V1 तामर्च्य (sic) —^{b}) D2 उपनिष्ट (इत ?) (for °विष्टं) B2 G1 च, Dg1 marg (for स) G2 M1 (after corr *sec m* as in text) राघव —^{c}) D1 3 भरद्वाजो —^{d}) M4 राजपुत्रम् (for धर्मयुक्तम्) Ś1 Ñ2 B Dt1 D4 5 7 हित, Dg1 D3 तथा, M4 तत (for तदा)

19 ^{ab}) Dd1 काकुत्स्थं G2 M1 पश्यामि काकुत्स्थ (by transp) Dt1 [अ]द्य समुपागत, Ct as in text (for त्वामिहागतम्) Ñ2 V1 B2–4 D1–3 M4 दिष्ट्यासि (P4 °हि) कुशली राम समाश्रमसुपा (B4 °नुप [sic]) गत, B1 दिष्ट्यासि कुशली राममाश्रमं समुपागत, D1 दिष्ट्यासि कुशली राम आश्रमं समुपागत —^{c}) Ñ2 V1 B1 3 4 D1–3 M4 हि ते (D2 मे) (for तव) Ñ2 V1 B1 3 4 D1–3 M4 पित्रा, Dt1 Dd1 Dm1 चैव (for चेदं) B2 न श्रुत हि मया पित्रा —^{d}) Ś1 V1 D1 2 4 6 7 M4 अकारणात् (V1 D1 2 M4 °णे) (for °णम्) —After 19, D5 ins

1137* यशस्यं श्रावणीयं च देवानामपि सुप्रियम् ।
धन्यौ तथा च पितरौ सत्यधर्मपरायणौ ।
ययोस्त्वं तरणार्थाय जातो हृदयवल्लभ ।
सुव्रत पितृवर्ती च यशस्वी दृढनिश्चय ।

20 ^{a}) B2 3 विमुक्तोयं, G1 [ऽ]पि युक्तोय (for विविक्तोऽयं) —^{b}) Dm1 समागम, T3 तु सगमे (for समागमे) Ś1 Ñ2 V1 B D1–7 M4 रमणीय (B1 °यं [sic]) श्च राघव (B4 D1 °व [sic]) —^{c}) Dt1 पुण्य. —^{d}) Dm1 वसन्विह, T3 वसन्विव —For 20^{cd}, Ś1 Ñ2 V1 B D1–7 M4 subst

1138* गङ्गायमुनयो पुण्य सगमो लोकविश्रुत ।

[V1 पुण्य D3 पुण्या (sic), D6 तत्र (for पुण्य) D3 तत्र विश्रुत (for लोक°)]

—Then cont

1139* इह राम मया सार्धं वस त्वं यदि रोचते ।
वनं साधारणं हीदं तपोवननिवासिनाम् ।
इह त्वं रस्यसे सार्धं सीतया लक्ष्मणेन च ।

[(l 1) D2 त्व सीतया (for राम मया) D1 उत्र (sic), D2 वसत (sic) (for वस त्व) B1 रोचसे —(l 2) Ñ2 B2–4 सर्व- (for वनं) V1 D2 3 हीनं, M4 ह्येतत् (for हीदं) D5 -निवासिना —Ñ2 V1 B1 D1 M4 om l 3 —(l 3) Ś1 D6 [र]त्र (for त्वं)]

21 ^{a}) G2 सुवचन —^{c}) M2 हित (for शुभं) —For 21, Ś1 Ñ2 V1 B D1–7 M4 subst .

1140* तमेववादिनं राम कृताञ्जलिरभाषत ।
वसतोऽनुग्रहो मे स्यादिह ब्रह्मस्त्वया सह ।

[(l 1) D3 एव (for एव-) —(l 2) V1 [ऽ]त्र तुतो (for ऽनुग्रहो) D7 मया (for त्वया)]

भगवन्नित आसन्नः पौरजानपदो जनः ।
आगमिष्यति वैदेहीं मां चापि प्रेक्षको जनः ।
अनेन कारणेनाहमिह वासं न रोचये ॥ २२
एकान्ते पश्य भगवन्नाश्रमस्थानमुत्तमम् ।
रमते यत्र वैदेही सुखार्हा जनकात्मजा ॥ २३
एतच्छ्रुत्वा शुभं वाक्यं भरद्वाजो महामुनिः ।
राघवस्य ततो वाक्यमर्थग्राहकमब्रवीत् ॥ २४
दशक्रोश इतस्तात गिरिर्यस्मिन्निवत्स्यसि ।
महर्षिसेवितः पुण्यः सर्वतः सुखदर्शनः ॥ २५
गोलाङ्गूलानुचरितो वानरर्क्षनिषेवितः ।
चित्रकूट इति ख्यातो गन्धमादनसंनिभः ॥ २६
यावता चित्रकूटस्य नरः शृङ्गाण्यवेक्षते ।
कल्याणानि समाधत्ते न पापे कुरुते मनः ॥ २७

---

22 a) G2 इच (sic) (for इत) —For 22ab, Ś1 Ñ2 V1 B D1–7 M4 subst

1141* इतस्तु विषयोऽस्माकमभ्याशे तपतां वर ।

[V1 इद तु, B1 इट स्व, D2 रति तु, M4 अतस्तु (for इतस्तु) D3 ins श्री after इत Ñ2 V1 तपसा वर]

—Ś1 V1 D1–7 M4 cont, Dg1 Dt1 Dd1 Dm1 T G M1–3 ins after 22ab

1142* सुदर्शमिव पश्यामि स्वजनस्य ममाश्रमम् ।

[D4 7 आदर्शम् (for सु°) V1 सु- (for स्व) Ś1 D4–7 पौराणामिह चागम(D4 5 °मिममाश्रम[D4 °य], D7 °मिव माश्रय [sic]) (for the post half) Dg1 Dt1 Dd1 Dm1 T G M1–3 सुदर्शमिह मा प्रेक्ष्य मन्येहमिममाश्रम]

—Ś1 D4–7 further cont

1143* अभ्याशे वर्तमान मा श्रुत्वा दूराद्दिदृक्षव ।

[D6 7 अभ्यासे]

—cd) Ś1 Dm1 D4 6 7 आगमिष्यति Ś1 D4–7 मामपि प्रेक्षका जना (for d) Ñ2 V1 B D1–3 M4 आगमिष्यति सुव्यक्त द्रष्टु मामिह बाधवा —f) V1 D1 2 इम, B4 इव (for इह) Ñ2 वासो, D2 वाच (for वास) Ñ2 D1 रोचते

23 b) D7 वासस्थानमनुत्तम —c) D4 रमेच्च तत्र, D7 रेमे च तत्र (for रमते यत्र) —d) Ś1 D4 6 7 सुखेन, G2 सुखान्वो (for सुखार्हा) —For 23, Ñ2 V1 B D1–3 M4 subst, Ś1 D6 ins l 2–3, D5 l 3 after 23

1144* अन्यमाश्रममेकान्ते विविक्त वक्तुमर्हसि ।
वसेय यत्र वैदेह्या सहितो लक्ष्मणेन च ।
स्वजनेनापरिज्ञातो निरुद्विग्न सुखी वने ।

[(l 1) D1 विवक्तु (sic) V1 D1–3 M4 द्रष्टुम् (for वक्तुम्) —D1 om l 2–3 —(l 2) D6 वसेह (for °य) Ñ2 B तत्र (for यत्र) M4 सहितो वैदेह्या (by transp) —(l 3) V1 सुजनेन, D6 स्वजनैर् (for स्वजनेन) V1 [अ]तिविज्ञातो, D2 परिज्ञातो(before corr °त्यागो) (for [अ]परिज्ञातो) Ś1 D6 निरुद्वेग (for °द्विग्न) B2–4 D2 3 5 6 मुने (for वने)]

—Thereafter V1 B4 D1–3 5 cont

1145* वसेय यत्र तन्मे त्वमुपदेष्टुमिहार्हसि ।

[V1 यत्र तन्मेत्र (with hiatus), D2 नत्र मे त्व मि (with hiatus) (for यत्र तन्मे त्वम्) V1 त्वन्, D1 मम (for इह)]

24 a) Ś1 Ñ2 V1 B D1 3 6 M4 इति रामवच श्रुत्वा, D4 5 7 राघवस्य वच. श्रुत्वा —b) D4 5 7 महानृषि —cd) Dt1 Dd1 Dm1 तु तद् (for ततो) D4 5 7 तस्य वाक्य (D6 कार्यार्थं च) निशम्ये(D5 7 °रीक्ष्ये)दमनुकूल(D5 °रूप) वचोब्रवीत —For 24cd, Ś1 Ñ2 V1 B D1–3 M4 subst

1146* ध्यात्वा मुहूर्तमेकाग्रो राम वचनमब्रवीत् ।

[V1 एवाग्रे, M4 एकाग्रे (for °ग्रो)]

25 a) Ś1 D4–7 त्रियोजनम्, G3 दशक्रोशम्, M3 दश (for दशक्रोश) M3 lacuna for इतस्तात Ñ2 V1 B D1–3 M4 इतस्त्रि(Ñ2 °ति त्रि, D1 °तस्तु, D3 . स्त्रि)योजनाद्राम —b) Ś1 Ñ2 V1 B D2 4–7 T1 2 G1 3 M2–4 यत्र, Cr.m g as in text (for यस्मिन्) Ś1 V1 B2 Dd1 D2 4 निवत्स्यति, D7 त्रि° (for निवत्स्यसि) —c) Ś1 D4–7 -गण(Ś1 D6 जन)सघु (D6 °जु)ष्ट, D1 -सवृत पुण्य (for -सेवित पुण्य) —d) Dt1 Dm1 पर्वत, M3 सर्वत्र (for सर्वत) Dt1 Dd1 Dm1 शुभदर्शन, M3 प्रियदर्शन Ś1 Ñ2 V1 B D1–7 M4 सर्वर्तु(Ñ2 B °र्त्तस्य, D1 3 4 7 °र्वत्र, D6 °र्वं तु [sic])सुखद शिव.

26 M4 om 26ab —a) Ś1 Ñ2 B D1 5 7 गोलाङ्गूलाभिन (B4 °मु)दितो, V1 गोलागुलाभिमुदितो, Dt1 °गुलानुचरितो, D2 °गुलाभिनन्दितो, D3 4 गोलागूलातिनन्दितो, D6 °लाभिरु- दितो —b) V1 वानरैश्च, D5 नानापक्षि- (for वानरर्क्ष-) —After 26, D3–5 7 (D4 5 7 subst l 1 for 29ab) ins

1147* युक्तरूपमह मन्ये त वास भवत सुखम् ।
कपालशिरसा योऽसौ चिरमध्युषित पुरा ।

[(l 1) D4 दयित, D7 वास त (by transp) D3 शिव (for सुखम्) —(l 2) D5 चिश्रम् (for चिरम्)]

27 a) Ś1 Ñ2 V1 B D1–3 6 M4 यावद्भि, D4 5 7 यावति (for यावता) D2 चित्रकूट स, D3 चित्रकूटस्थ स्म (hypm) (for °कूटस्य) —b) Ś1 D4–7 [उ]दीक्षते, Ñ2 B D1–3 M4 पश्यति (for [अ]वेक्षते) V1 नर शृंग निवत्स्यति —c) Ś1 Ñ2 V1 B D1–3 6 M4 तावत्कल्याणमाप्नोति —d) Ś1 Ñ2 V1 B D1–7 M4 धर्मे च, Dt1 न मोहे (for न पापे) Ñ2 B मतिं (for मन)

ऋषयस्तत्र बहवो विहृत्य शरदां शतम् ।
तपसा दिवमारूढाः कपालशिरसा सह ॥ २८
प्रविविक्तमहं मन्ये तं वासं भवतः सुखम् ।
इह वा वनवासाय वस राम मया सह ॥ २९
स रामं सर्वकामैस्तं भरद्वाजः प्रियातिथिम् ।
सभार्यं सह च भ्रात्रा प्रतिजग्राह धर्मवित् ॥ ३०
तस्य प्रयागे रामस्य तं महर्षिमुपेयुषः ।
प्रपन्ना रजनी पुण्या चित्राः कथयतः कथाः ॥ ३१
प्रभातायां रजन्यां तु भरद्वाजमुपागमत् ।
उवाच नरशार्दूलो मुनिं ज्वलिततेजसम् ॥ ३२
शर्वरीं भगवन्नद्य सत्यशील तवाश्रमे ।
उषिताः स्मेह वसतिमनुजानातु नो भवान् ॥ ३३
रात्र्यां तु तस्यां व्युष्टायां भरद्वाजोऽब्रवीदिदम् ।
मधुमूलफलोपेतं चित्रकूटं व्रजेति ह ॥ ३४

28 [a]) Ñ2 V1 B D1–3 M4 मुनयस्. B2 शतशो, M3 बहुशो (for बहवो) —[b]) B3 4 निवृत्य (for विहृत्य) V1 D4 5 7 M4 शरद (for शरदां) —[c]) D1 3 दिव्यम् (for दिवम्) V1 स्वर्गं तत्तपसारूढा —[d]) Ś1 D6 सुकृतैकनिषेवणात् ❀ Cv कपालशिरसा सह शरीरेण सहेति यावत्। कपालशिरसा मुनिना सह इत्यन्ये।, Cr तपश्चरणे निरन्तरकपालासनेन प्रक्षीणत्वच्छिरोरुहतया कपालावशिष्टशिरसा सह सर्वं दिवमारूढा इत्यर्थः । कपालशिरसेत्येतच्छरीरस्योपलक्षणम्।, Cg कपालरूपशिरोयुक्तेन इति अध्याहृतशरीरपदविशेषणमित्येके। कपालमात्रावशिष्टं शिरो यस्मिन्निति तपोविशेषणमित्येके।, Ck दुर्भिक्षमृतनृकपालवत् पलितेन शुक्लं शिरस्तथा मध्यमपदलोपीसमास । तादृशेन शिरसा सह। ❀ —After 28, D4 5 7 ins

1148* तत्र चावस काकुत्स्थ नानाविहगनादिते ।

[D5 वा (for च)]

29 [a]) Ś1 Ñ2 V1 B D1–3 6 M4 त विवि(B1 °भ, D2 °*)क्तम् —[b]) Dm1 निवास Ś1 Ñ2 V1 B D1–3 6 M4 वास ते रघुनंदन —For 29[ab], D4 5 7 subst l 1 of 1147* and read after 26 —D5 om 29[c]–34 —[cd]) Ś1 Ñ2 B D4 6 7 पुरुषव्याघ्र (for वनवासाय) B4 om सह V1 D1–3 M4 शका चैता(D3 °का चेमा, M4 °कामेता) परित्यज्य वसेह सहितो मया(V1 °नया) —After 29, Ś1 Ñ2 B D4 6 7 ins

1149* सर्वथा रस्यसे राम तस्मिन्नाश्रममण्डले ।
लक्ष्मणेन सह भ्रात्रा सीतया चानयानघ ।

[(l 1) Ś1 मस्यमे, B4 वश्यमे (sic) (for रस्यमे) B2 -मडने —(l 2) Ś1 D4 6 7 वदेह्या चापि भार्यया (for the post half)]

30 D5 om 30 (cf v l 29) —[ab]) Ñ2 V1 B D1–3 M4 इत्युक्त्वा (for स राम) B4 त्व, D3 M2 तु (for त) B1 2 D1 प्रि(B1 ध्रि)यातिथि (for °तिथिम्) Ś1 D4 6 7 एवमुक्त्वा तत कामै(Ś1 कदै)र्भ(D6 °र्भा)रद्वाजोथ राघव —[c]) Ñ2 V1 B D1–3 M4 सा(V1 चा)नुज चैव(B2 चापि), D4 7 च सह भ्रात्रा (by transp) (for सह च भ्रात्रा) Ś1 D6 सहभार्यं सह भ्रात्रा —[d]) ❀ Cgp प्रतिजग्राह उपचचार। ❀ Dt1 हर्षयन्, M4 राघव (for धर्मवित्) Ś1 D4 6 7 महर्षि प्रत्यपूजयत्

31 D5 om 31 (cf v l 29) —For 31[ab], Ś1 Ñ2 V1 B D1–3 6 M4 subst

1150* तस्य भुक्तवतस्तत्र त मुनि समुपासत ।

[V1 धर्मवतस् (for भुक्त°) M4 तस्य (for तत्र) D3 समुपागत (sic) Ñ2 B तदानीं(B1 °मा) मुनिना सह (for the post half)]

—[c]) Ś1 Ñ2 V1 B D1–3 6 M4 जगाम, T2 प्रपन्ना (for प्रपन्ना) —[d]) Ś1 V1 D1–3 6 M4 विचित्रा (D1 °त्रा) शृण्वत कथा (D1 °था) —For 31, D4 7 subst

1151* ततो निवृत्ते दिवसे प्रवृत्ता रजनी शुभा ।
ता कथा मुनिना सार्धं चित्रा कथयतस्तदा ।

—After 31, Dg1 Dt1 Dd1 Dm1 S ins

1152* सीतातृतीय काकुत्स्थ परिश्रान्त सुखोचित ।
भरद्वाजाश्रमे रम्ये ता रात्रिमवसत्सुखम् ।

[(l 2) G2 M1 2 4 पुण्ये (for रम्ये) M3 स रात्रिम्, M4 रजनीम् (for ता रात्रिम्)]

32 D5 om 32 (cf v l 29) D2 4 7 om 32–33 —[a]) Dt1 Dd1 Dm1 G1 2 M1 तु शर्वर्यां (for रजन्या तु)

33 D2 4 5 7 om 33 (for D2 4 7 cf v l 32 and for D5, cf v l 29) —[a]) Dd1 Dm1 G1 M1 शर्वरी, Cm g k t as in text (for °रीं) —[b]) T1 त्व, G2 तम् (for तव) Dd1 [आ]श्रम (for °मे) —[c]) G1 वसतीम् (sic), G2 भवतिम् (sic) —[d]) T3 अनुजानाति (for °तु) —For 32–33, Ś1 Ñ2 V1 B D1 3 6 M4 subst

1153* तस्या रात्र्या व्यतीताया सध्यामन्वास्य राघव ।
उपतस्थे महर्षि त तमुवाच ततो मुनि ।

[(l 1) Ś1 तस्या रात्रौ, D3 रात्र्या तस्या (by transp) V1 D3 च(D3 .) व्युष्टाया D1 M4 रात्र्या च तस्या व्युत्थाय(M4 °ष्टाया) (for the prior half) Ś1 चोपास्य (for अन्वास्य) Ś1 D6 सानुज, V1 D1 लक्ष्मण (for राघव) —(l 2) Ñ2 तु (for त) Ś1 D6 उवाच च (for तमुवाच) M4 महामुनि]

34 D5 om 34 (cf v l 29) —[a]) D4 7 तस्या रजन्या, M2 3 रात्र्या च तस्या —[b]) D4 7 महातपा, G2 M1 [ऽ]ब्रवीदिति —[d]) Dd1 Dm1 गिरि व्रज, D4 7 अदर्शयत,

तत्र कुञ्जरयूथानि मृगयूथानि चाभितः ।
विचरन्ति वनान्तेषु तानि द्रक्ष्यसि राघव ॥ ३५

प्रहृष्टकोयष्टिककोकिलस्वनै-
विनादितं तं वसुधाधरं शिवम् ।
मृगैश्च मत्तैर्बहुभिश्च कुञ्जरैः
सुरम्यमासाद्य समावसाश्रमम् ॥ ३६

इति श्रीरामायणे अयोध्याकाण्डेऽष्टचत्वारिंशः सर्गः ॥ ४८ ॥

G2 व्रजेति हा, Cv g k as in text (for व्रजेति ह) —For 34, Ś1 Ñ2 V1 B D1–3 6 M4 subst

1154* चित्रकूटमितो राम गच्छाशु सह सीतया ।
लक्ष्मणेन च विस्रब्ध तत्र त्व विहरिष्यसि ।
शुचिशीताम्बुवाहिन्या मन्दाकिन्योपशोभिते ।
मन्येऽह तत्र ते वास रम्ये स्वादुफलोदके ।

—(l 1) Ś1 D6 गत्वा (for राम) Ś1 D6 रमस्व, D2 गत्वाशु (for गच्छाशु) —(l 2) B3 om च Ś1 B3 4 D1–2 विश्रब्ध, B1 2 M4 विश्र(B2 M4 °स्र)ब्धस् (for °स्रब्ध) —After l 2, B1 ins तत्र वै —(l 3) Ñ2 B रम्ये, D2 न, D4 7 शिव-, M4 शुभ- (for शुचि-) B2 सित-, B4 शीते (for शीत-) D4 7 M4 [उ]पशोभित —B2 om l 4 —(l 4) Ñ2 B3 स-, V1 त (for ते) B4 राम (sic) (for वास)]

—After 34, Dg1 Dt1 Dd1 Dm1 D4 7 T G M1–3 ins

1155* वासमौपयिक मन्ये तत्र राम महाबल ।
नानानगगणोपेत किन्नरोरगसेवित ।
मयूरनादाभिरुतो गजराजनिषेवित ।
गम्यता भवता शैलश्चित्रकूट स विश्रुत ।
पुण्यश्च रमणीयश्च बहुमूलफलायुत । [5]

[For l 1, D4 7 subst and read after line 5

1155(A)* वासानुरूप मन्येऽह तवैन धरणीधरम् ।
शुचिशीताम्बुवाहिन्या मन्दाकिन्योपशोभितम् ।

—(l 2) Dm1 -मृग, Cm as above (for -नग-) G1 -गणोपेत (for °त) G1 -सेवित —(l 3) Dt1 नादाभिरतो, G1 -राजाभिरुतो (for नादाभिरुतो) —(l 4) G2 M1 यत्र वै (for भवता) D4 7 एष राम(D7 °) महाबलश् (for the prior half) D4 7 इति श्रुत, T3 M3 सुविश्रुत, G1 शुचि श्रुत (sic) (for स विश्रुत) —(l 5) D4 7 -फलोपग (for -फलायुत)]

35 [a]) D4 7 अत्र Ñ2 B D4 5 7 कुंजरयूथाश्च —[b]) B3 om मृग- Ñ2 D4–6 -यूथाश्च(D6 °), B3 om (for -यूथानि) Ñ2 B सर्वत, V1 अभित, Dt1 Dd1 Dm1 चैव हि, D3 राघव, D4 5 निर्वृता, G3 चामित (sic) (for चाभित) D7 करिणीसहिता सुखं —[c]) D3 विचरिष्यति (hypm) Dg1 वनातेस्मिन् —[d]) Ś1 D6 तत्र, B2 D4 5 7 तास्त्व(B2 °श्च) (for तानि) D2 द्रक्ष्यति (for °सि) B3 D2 राघव(D2 °व) —After 35, Dg1 Dt1 Dd1 Dm1 S G(ed) ins.

1156* सरित्प्रस्रवणप्रस्थान्दरीकन्दरनिर्झरान् ।
चरत सीतया सार्धं नन्दिष्यति मनस्तव ।

[(l 1) Dm1 गुहा-, G3 दरि-, Cm as above (for दरी-)]

36 D4 5 7 om 36 —[a]) Ś1 Ñ2 V1 B D3 6 दात्यूह-, D2 इत्यूह- (sic), M4 नत्यूह- (sic) (for प्रहृष्ट-) B4 Dt1 Dd1 Dm1 T3 M2 3 Ct -कोयष्टिभ- (B4 °ं, Dt1 °भ [sic], T3 M2 3 Cv k °म), Cr m g as in text (for -कोयष्टिक-) D2 -कोलनि.- (sic) (for -कोकिल-) —[b]) Dd1 Dm1 विनोदयत (for °नादित त) Dt1 विनोदयत च सुख पर शिव —[c]) G1 वृंदैश् (for मृगैश्) —[d]) Ñ2 स्वरम्यम् M4 पुरा समासाद्य Ś1 Ñ2 B D1–3 6 तम् (for सम्) Dg1 Dt1 G2 [आ]श्रय (for °मम्) V1 °मासाद्यत राममाश्रम

Colophon D4 5 7 om —*Sarga name* Ś1 V1 B2 4 D2 6 भरद्वाजाभिगमन(D2 °न), Ñ2 B3 वनप्रवेशे भरद्वाजा(Ñ2 °जो [sic])भिगमन, B1 D3 भरद्वाजाश्रमाभिगमन (B1 °न), D1 भरद्वाजाश्रमगम —*Sarga no* (figures, words or both) B1 4 D3 om, Ś1 58, Ñ2 53, V1 Dg1 Dt1 Dd1 Dm1 S 45, B2 43, B3 52, D1 110, D2 57, D6 55. —After colophon, D6 concludes with रामाय नम, T2 श्रीरामचन्द्राय परमगुरवे नम, G श्रीरामाय नम

४९

उषित्वा रजनीं तत्र राजपुत्रावरिंदमौ ।
महर्षिमभिवाद्याथ जग्मतुस्तं गिरिं प्रति ॥ १
प्रस्थितांश्चैव तान्प्रेक्ष्य पिता पुत्रानिवान्वगात् ।
ततः प्रचक्रमे वक्तुं वचनं स महामुनिः ॥ २

अथासाद्य तु कालिन्दीं शीघ्रस्रोतसमापगाम् ।
तत्र यूयं प्लवं कृत्वा तरतांशुमतीं नदीम् ॥ ३
ततो न्यग्रोधमासाद्य महान्तं हरितच्छदम् ।
विवृद्धं बहुभिर्वृक्षैः श्यामं सिद्धोपसेवितम् ॥ ४

49

☞ Ñ1 missing for Sarga 49 (cf v l 1058*) D4 5 7 continue the previous Sarga M1 2 begin with श्रीरामाय नम

1 ^{ab}) D4 5 7 उषित्वा तत्र रजनीं सुखमिक्ष्वाकुनंदनौ —D5 om 1^{cd} —^{cd}) Dd1 Dm1 G2 [ए]व (for [अ]थ) D4 7 अभिवाद्य ततो जग्मुर्मुनिमुद्दिश्य त गिरि —For 1, Ś1 Ñ2 V1 B D1–3 6 M4 subst

1157* तौ तत्र रजनीमुष्य सुखमिक्ष्वाकुनन्दनौ ।
अभिवाद्य महर्षिं तं दधतुर्गमने मन ।

[(l 1) Ñ2 B तामु(B2 4 °बु)षित्वा निशा तत्र (for the prior half) —(l 2) B4 सदर्पं (for महर्षिं). Ñ2 B मतिं (for मन)]

—B3 (marg) cont, Dg1 Dt1 Dd1 Dm1 D4 7 T G M1–3 ins after 1

1158* तेषा चैव स्वस्त्ययन महर्षि स चकार ह ।

[B3 जय, D4 7 तदा (for चैव) Dt1 Dd1 Dm1 transp चैव and स्वस्त्ययन B3 महर्षिरनुचर्यवान्, D4 7 जजाप त(D7 ज) पता वर (for the post half)]

2 B3 reads 2^{ab} in marg —^{a}) B3 कृत्वा प्रेक्ष्योन्वितश्चैव, Dg1 Dt1 Dd1 Dm1 G2 M1 3 प्रस्थितान्प्रेक्ष्य ताश्चैव, D4 5 7 प्रस्थितान्प्रे(D7 °नी)क्ष्य चाप्येतान् —^{b}) B3 [अ]न्वयात्, Dt1 Dd1 Dm1 D4 5 7 [औ]रसान्, T1 2 Cg*p* [अ]न्वयात्, Cg as in text (for [अ]न्वगात्) —For 2, Ś1 Ñ2 V1 B1 2 4 D1–3 6 M4 subst, B3 subst for 2^{cd} only

1159* तौ प्रयातावभिप्रेक्ष्य भरद्वाजो महामुनि ।
चित्रकूटस्य पन्थानमुपदेष्टु प्रचक्रमे ।
राघव त्वमितो देशान्पश्यन्नावसथान्बहून् ।

[(l 1) D2 3 अभिवीक्ष्य Ś1 D6 प्रयाता रजनीं वी(D6 प्रे)क्ष्य (for the prior half) D2 3 भारद्वाजो —(l 3) B1 2 4 देशात् V1 D1–3 M4 इतो देशाद्राघव त्व (for the prior half) D2 वसन् (for पश्यन्) V1 आवसतान्, D6 आवसत्वान्]

—After 2, Dg1 Dt1 Dd1 Dm1 D4 5 7 T G M1–3 ins

1160* भरद्वाजो महातेजा राम सत्यपराक्रमम् ।
गङ्गायमुनयो सधिमासाद्य मनुजर्षभौ ।
कालिन्दीमनुगच्छेता नदीं पश्चान्मुखाश्रिताम् ।

[(l 1) D5 [स]मिततेजा —(l 2) Dt1 आदाय (for °साद्य) D4 5 7 पुरुषर्षभौ —(l 3) D5 अथ (for अनु-) G1 -गच्छेथा D4 5 7 मुखो गिवा, G1 मुखाश्रृता (for मुखाश्रिताम्)]

3 D4 5 7 om. 3^{ab} —^{b}) Dt1 Ct प्रतिस्रोत समागता —After 3^{ab}, Dg1 Dt1 Dd1 Dm1 T G M1–3 ins, while D4 5 7 cont after 1160*

1161* तस्यास्तीर्थं प्रचरित पुराण प्रेक्ष्य राघव ।

[Dm1 T2 Cm प्रचलित D4 तस्यास्तु तीर्थं त्वरित, D5 तस्यास्तीर्थं त्वरीत (sic), D7 तस्या सुतीर्थं त्वरित (for the prior half) Dt1 Dd1 Dm1 प्रकाम (for पुराण) D4 5 7 प्राप्य (for प्रेक्ष्य) Dg1 D4 5 7 G3 M2 राघवो, T3 M1 राघव]

—^{d}) Cr t [अं]शुमतीं (as in text), Cm g [आ]शु°. D4 7 तरतास्सु(D4 °शु)जला नदीं —For 3, Ś1 Ñ2 V1 B D1–3 6 M4 subst

1162* नातिदूरे समासाद्य तरेथा यमुना नदीम् ।
कृत्वोडुप ग्राहवती सा हि नित्य महानदी ।

[(l 1) Ñ2 B1 3 4 तरेस्त्व, B2 तरेस्तां, D6 तरेर्वा, M4 पश्येथा (for तरेथा) V1 तवेपा (sic) यमुनानदीं (for the post half) —D3 read l 2 twice —(l 2) B4 कृत्वोडुग, D6 कृत्वोड्डप, M4 महाह्रदा Ś1 B3 D1–3 ग्राहवतीं]

4 ^{a}) D4 5 7 तत्र (for ततो) —^{b}) D5 सरितच्छदं —^{c}) Dt1 Dd1 Dm1 परी(Dd1 °रि)त (for विवृद्ध) D4 (after corr *sec m* as in text) वृक्षे —For 4, Ś1 Ñ2 V1 B D1–3 6 M4 subst

1163* तस्या नद्या परे पारे नातिदूरे महाद्रुम ।
सत्याभियाचन श्रीमान्न्यग्रोधो हरितच्छद ।
नानासत्त्वगणावास श्याम इत्यभिविश्रुत ।

[(l 1) M4 (after corr *sec m* as above) तास्या —(l 2) Ś1 स चापि पावित, Ñ2 B2–4 D1 2 सत्याभियाचित (D2 °न), D6 सत्यापि पावित (for सत्याभियाचन) —After l 2, B3 ins

1163(A)* स्थिरच्छायो महावृक्ष सर्वेषा हितकारक ।

—(l 3) B1 -कृतावास, B4 D2 -गुणावास B4 [अ]पि (for [अ]भि-) D2 3 [अ]भित (D3 °r) श्रुत]

—Thereafter cont

1164* सीतेय तं नमस्कृत्य समभ्यर्च्य च पादपम् ।
अभियाचेत कल्याणी वर यदभिकाङ्क्षितम् ।

क्रोशमात्रं ततो गत्वा नीलं द्रक्ष्यथ काननम् ।
पलाशबदरीमिश्रं राम वंशैश्च यामुनैः ॥ ५

स पन्थाश्चित्रकूटस्य गतः सुबहुशो मया ।
रम्यो मार्दवयुक्तश्च वनदावैर्विवर्जितः ।
इति पन्थानमावेद्य महर्षिः स न्यवर्तत ॥ ६

उपावृत्ते मुनौ तस्मिन्रामो लक्ष्मणमब्रवीत् ।
कृतपुण्याः स्म सौमित्रे मुनिर्यन्नोऽनुकम्पते ॥ ७
इति तौ पुरुषव्याघ्रौ मन्त्रयित्वा मनस्विनौ ।
सीतामेवाग्रतः कृत्वा कालिन्दीं जग्मतुर्नदीम् ॥ ८
तौ काष्ठसंघाटमथो चक्रतुः सुमहाप्लवम् ।
चकार लक्ष्मणश्छित्त्वा सीतायाः सुखमासनम् ॥ ९

[(l 1) Ś1 D6 सीतापि (for सीतेय) V1 म-, M4 ते (for त) V1 D1 2 मुसत्कृत्य, D3 सुमत्कृत्य, M4 समभ्यर्च्य (for नमस्कृत्य) M4 सुमत्कृत्य (for समभ्यर्च्य) —(l 2) B3 अभियाचेत्तु Ś1 D6 कल्याण (for °णी)],
while Dg1 Dt1 Dd1 Dm1 D4 5 7 T G M1–3 ins after 4

1165* तस्मै सीताञ्जलिं कृत्वा प्रयुञ्जीताशिषः शिवाः ।
समासाद्य च तं वृक्षं वसेद्वातिक्रमेत वा ।

[(l 1) D4 5 7 तस्य (for तस्मै) Dm1 शिवा Dt1 Ct [आ]शिषा क्रिया D4 5 7 व्य(D4 न्य, D5 नि)युञ्जीताशिषोपि वा (D5 च) (for the post. half) —(l 2) T G1 2 M1 तु (for च) M3 [अ]तिक्रमेति (sic) D4 7 वमना च व्रजेत्तत, D6 वसित्वा प्रव्रजेद्भवान् (for the post half)]

5 b) B1 D1 7 द्रक्ष्यत, Dt1 Dd1 Dm1 प्रेक्ष्य च B1 illeg for काननम् —c) Dt1 Dd1 Dm1 शल्लकी- (for पलाश-) Ñ2 V1 B D1–3 M4 -वश- (for -मिश्र) —d) D4 7 युत, K(ed) रम्य (for राम) Ś1 Ñ2 B D1–3 6 M4 मधू(Ś1 Ñ2 B4 D6 °धु)काम्रवना(B3 M4 °णा)युत, V1 -मधूकाश्रवणायत, Dt1 राम वन्यैश्च यामुनैः, G(ed) मधुकाम्रवनाकुल

6 b) V1 गतं, Dd1 Dm1 यात, D2 तत (for गत) M4 इह (for मया) Dt1 T2 गतस्य बहुशो मया —V1 D1 2 M4 om 6^{cd} —c) M1 (after corr *sec m*) रम्ये Ś1 Ñ2 B D3–7 चाश्रमयुक्तश्च —d) Dt1 Dd1 Dm1 T G1 3 (before corr) M2 3 दावै(T3 °वा [sic], M3 °व)श्चैव, Cm g as in text (for वनदावैर्) Dg1 च वर्जित (for विवर्जित) Ś1 Ñ2 B D3–7 वनदोषैश्च(Ñ2 B °षै स, D3–5 7 °षैर्वि) वर्जित —ef) M3 इत्थ (for इति) Dt1 Dd1 Dm1 D4 7 G1 आदिश्य, D5 आश्रित्य (for आवेद्य) Dg1 Dt1 G1 सन्यवर्तत Ś1 Ñ2 V1 B D1–3 6 M4 पथानमुपदिश्यैव(V1 D1 2 °देश्यैव, B2 D3 °दिश्यैन) भरद्वाजो न्य(D3 °भ्य)वर्तत —After 6, Ś1 Ñ2 B D4–7 ins

1166* रामेण लक्ष्मणेनापि सीतया चाभिवादित ।

[B1 [अ]थ (for [अ]पि) Ś1 सीतया चापि (before corr °पि च) वदित (for the post half) D4 7 रामेण सीतया वा (D7 चा)पि लक्ष्मणेनाभिवादित],
while Dg1 Dt1 Dd1 Dm1 T G M1–3 ins

1167* अभिवाद्य तथेत्युक्त्वा रामेण विनिवर्तित ।
[Dt1 विनिवर्जित]

7 a) D1 उपावृत्ते, D3 उपावर्ते, D6 तपावृत्तो, G3 अपावृत्ते (for उपावृत्ते) —b) V1 सुपद तट तर, D1–3 स्वमाश्रमपद तत, M4 गन्वाध्वान तत पर —V1 D1–3 M4 om 7^{c}–8^{b} —c) M3 तु (for स्म) Ś1 Ñ2 B D4–7 कृतपुण्योस्मि सौमित्रे. —d) Ś1 Ñ2 B3 D4–7 मानुकपते, Dm1 नानुकपते, T3 नो न कल्पते B1 2 4 मुनिर्यदनुकपते.

8 V1 D1–3 M4 om 8^{ab} (cf v l 7) —a) B2 reads तौ in marg —b) D4 5 7 कथयतौ (for मन्त्रयित्वा) Ś1 Ñ2 B D6 कथयतौ यश(B1 तप)स्विनौ —c) V1 D1–3 M4 सीतासहायौ काकुस्थौ(M4 कालिदीं) —d) V1 मन्वाना, D1–3 M4 यमुना (for कालिन्दीं) Ś1 Ñ2 B D4–7 तदा (for नदीम्) —After 8, D2 4 5 7 ins, Dg1 Dt1 Dd1 Dm1 T G M1–3 ins l 3–4 only

1168* ते गत्वा किंचिदध्वानं ददृशुर्विमलां नदीम् ।
दिव्यामंशुमतीं नाम शीघ्रतोयप्रवाहिनीम् ।
अथासाद्य तु कालिन्दीं शीघ्रस्रोतोवहां नदीम् ।
चिन्तामापेदिरे सर्वे नदीजलतितीर्षव ।
ततोऽब्रवीद्दाशरथिः सौमित्रिमपराजितम् ।
दिव्या सरिदियं पुण्या यामुनो यत्र पर्वत ।
न त्वस्मिन्पुरुषावाम पश्यामि पुरुषर्षभ ।
स त्वं कुरुष्व संघाटं सुखं येन तरेम च ।
स वीर शासनं भ्रातुः सर्वमप्रतिकूलयन् ।
निरीक्ष्य तद्वनं सर्वं गृहीत्वा खड्गमुत्तमम् ।

[(l 1) D5 कश्चिद् D2 अध्वाने —(l 3) Dt1 शीघ्रस्रोतस्विनीं नदीं, T2 शीघ्रस्रोतसमापगा, G2 M1 शीघ्रस्रोता महानदीं (for the post half) D2 4 5 7 समासाद्य तु ता वीरा तरंगावर्तमालिनीं —(l 4) Dt1 Dd1 Dm1 सद्यो (for सर्वे) D2 4 5 7 -नितीर्षया —(l 5) D2 अपराजिन —D2 om l 10]

—Thereafter D2 4 5 7 cont l 2 of 1171*

9 b) Dg1 T1 2 G2 M1 तु, T3 स (sic), G1 च, G3 M3 त (for सु-) —For 9^{ab}, D2 4 5 7 subst and read after 9^{cd}

1169* बद्ध्वा लताभिर्वैत्रैश्च सुसंबद्धं दृढं तत ।
प्रचक्रे काष्ठसंघाटं सौमित्रिर्विपुलं प्लवम् ।

[(l 1) D2 महा-, D5 शाल्वैर् (for बद्ध्वा) D2 चतुर्बद्ध, D4 7 सुसबद्ध-, D5 सुस बद्ध]

तत्र श्रियमिवाचिन्त्यां रामो दाशरथिः प्रियाम् ।
ईषत्संलज्जमानां तामध्यारोपयत प्लवम् ॥ १०
ततः प्लवेनांशुमतीं शीघ्रगामूर्मिमालिनीम् ।
तीरजैर्बहुभिर्वृक्षैः संतेरुर्यमुनां नदीम् ॥ ११
ते तीर्णाः प्लवमुत्सृज्य प्रस्थाय यमुनावनात् ।
श्यामं न्यग्रोधमासेदुः शीतलं हरितच्छदम् ॥ १२

—Then cont

1170* कृत्वा च त तदाचर्यो राघवाय महात्मने ।
लक्ष्मणो लक्ष्मणोपेतो नदी समवतारयन् ।

[(1 2) D2 5 नद्या D2 समवतारित, D4 °यद्, D5 °रितु]
—After 9[ab], Dg1 Dt1 Dd1 Dm1 T G1 3 M2 3 ins, D2 4 5 7 cont 1 2 only after 1168*

1171* शुष्कैर्वंशै समाकीर्णमुशीरैश्च समावृतम् ।
ततो वेतसशाखाश्च जम्बुशाखाश्च वीर्यवान् ।

[(1 1) Dt1 वन्यै (for वशै) —(1 2) Dg1 Dt1 Dd1 Dm1 T3 वेतसशाखाश्च, D2 4 5 7 वेतसशाखाना D2 4 5 7 लताना (D2 रलाना [sic], D5 तालाना) चैव, T G1 3 जबू° (for जम्बुशाखाश्च)]

—c) Dm1 गत्वा, D7 छित्वा (sic) —d) D2 सीतार्थं, D4 7 वैदेह्या (for सीताया)

10 G2 M1 om 10 —a) Dg1 D2 4 5 7 T2 3 G3 M3 तत (for तत्र) D5 प्रियमिवाचिन्त्य (sic) —b) Ñ2 दशरथ (sic), M3 दाशरथि (sic) —c) Dd1 M2 ईषत्स- D2 4 5 7 ईषत्सलज्जा(D2 °ज्ज)मुद्यम्य(D7 °स्थाप्य) —d) D2 यमत्यारोपयत्प्लव, D4 7 समारोपयत प्लवं, D5 समध्यारोपयन्प्लव —For 9–10, Ś1 Ñ2 V1 B D1 3 6 M4 subst

1172* तत्र वद्ध्वोडुप काष्ठैर्वेणुभिश्चापि तीरजैः ।
सीतामारोपयाचक्रे रामस्तत्र स्वय तदा ।
परिगृह्य प्रिया बाला वेपमाना लतामिव ।
सीतामारोप्य रामोऽपि लक्ष्मणश्चाप्यरोहताम् ।

[(1 1) D3 कृत्वोडुप, D6 वद्धोडुप B1 काष्ठैर् V1 [illegible] काष्ठैर् (for the prior half) V1 वेणुजैश्, B4 रेणुभिर्, D6 वारजेश् (for वेणुभिश्) B1 चैव (for चापि) M4 transp वेणुभिश् and तीरजे —D6 om (hapl) 1 2–3 —(1 2) V1 om स्वय तदा —(1 3) Ś1 (marg) हृद्वा वाला, V1 श्रिय भार्या, D1 3 M4 प्रिया(D3 °या) भार्या (for प्रिया बाला) Ś1 कपमाना, V1 M4 सज्जमाना, D1 मद्गुमा च, D3 सज्यमाना (for वेपमाना) —M4 om 1 4 —(1 4) D1 चापि रोहता, D3 चाध्यरोहता Ś1 लक्ष्मण चाप्यरोहयत् (for the post half) V1 अधिरुह्य स्वय रामो लक्ष्मणश्चाधिरोहता]
—After 10, Dg1 Dt1 Dd1 Dm1 D2 4 5 7 T G M1–3 ins, D1 ins 1 5–10 only after 11[ab]

1173* पार्श्वे तत्र च वैदेह्या वसने भूषणानि च ।
प्लवे कठिनकाज च रामश्चक्रे सहायुधैः ।
आरोप्य सीता प्रथम सघाट परिगृह्य तौ ।
तत प्रतेरतुर्यत्तौ वीरौ दशरथात्मजौ ।
कालिन्दीमध्यमायाता सीता त्वेनामवन्दत ।
स्वस्ति देवि तरामि त्वा पारयेन्मे पतिव्रतम् ।
यक्ष्ये त्वा गोसहस्रेण सुराघटशतेन च ।
स्वस्ति प्रत्यागते रामे पुरीमिक्ष्वाकुपालिताम् ।
कालिन्दीमथ सीता तु याचमाना कृताञ्जलि ।
तीरमेवाभिसप्राप्ता दक्षिण वरवर्णिनी ।

[(1 1) Dg1 पार्श्वं D2 4 7 तु तत्र, K(ed) च तत्र (by transp) D5 पार्श्वेपु तत्र D2 4 5 7 वसनान् (D7 °ना-) —(1 2) D7 सुव (for प्लवे) D2 4 7 कठिनक चव, D5 कठिनके कृ(also क्र)त्वा (for कठिनकाज च) Dt1 समाहित, D2 महायुधे (for सहायुधै) —(1 3) D2 सघाट, D4 om, D5 7 सवाटे (for प्रथम) Dg1 transp सीता and प्रथम M3 प्रनिगृह्य D4 7 वै, G1 च (for तौ) D2 परितो तत (for परिगृह्य ता) —G3 illeg for 1 4–9 —(1 4) Dm1 प्रचेरतुर्यत्ता, D2 प्रयात तौ वीरो, D4 7 प्रयततुर् (D7 °तौ) वीरो, D5 प्रययतुर्वीरो (for प्रतेरतुर्यत्तो) Dt1 प्रीतौ, D2 4 5 7 तदा (for वीरा) —(1 5) D1 2 4 5 7 कालिंदीमध्यगा(D4 °गात्) सीता ता नदीमिदमब्रवीत —(1 6) Dm1 T G M3 त्वा D1 पारा(र)य, G1 तारयेन्, M2 पारयन् (for पारयेन्) D4 च, D7 चेत् (for मे) D1 2 7 M2 व्रत पति (by transp), D4 द्रुत पति, D5 व्रत प्रति, T3 G1 पतिव्रत —(1 7) T3 M2 3 त्वा D1 यक्षे त्वक्ष-, D2 4 5 7 यक्ष्ये(D7 °क्षे) त्वक्षि-(D5 °यि) (for यक्ष्ये त्वा गो-) D1 2 4 7 सुराभारशतेन, D5 सुराभाडशतेन, M2 सुराशतघटेन (meta) (for °घटशतेन) G2 सुरघट्टशतेन च (for the post half) —(1 8) D1 2 4 5 7 प्रत्यागते वनाद्रामे (for the prior half) —(1 9) D1 2 4 5 7 कालिंदीमथ तामेवमाशास्य तु (D2 7 सु)कृताजलि —(1 10) Dd1 Dm1 वरदर्शिनी]

11 a) Ś1 Ñ2 V1 B D1 3 6 M4 तेन (for तत) Ś1 B2 D6 प्लवेनाश्मवतीं, V1 D1 °नौवतीं, B1 3 °नाशुमतीं, B4 D3 M4 °नौववती, D2 4 5 7 °नांशुजला (for °नांशुमतीं) —b) D2 4 5 7 तरगावर्तसकुला —After 11[ab], D1 ins 1 5–10 of 1173* —c) Ś1 Ñ2 B D6 गहना, V1 ग्रहणा, D1 3 ग्रहना, M4 गहनैर् (for बहुभिर्) —d) Ñ2 V1 B D1 3 M4 तेरुस्ते(D3 ° [om hapl]), D2 सन्नता, D4 7 सतीर्य, T3 सुतेरुर् (for सतेरुर्) V1 यमुनानदीं

12 a) Ś1 D6 सतीर्य, Ñ2 सकीर्ण, V1 B D1 3 M4 सतीर्णा, Dt1 तेपु ते (for ते तीर्णा) —b) Ś1 Ñ2 V1 B D1 3 6 M4 प्रणम्य यमुना नदी (V1 D1 3 तत), D2 4 5 7 प्रजग्मुस्तु(D2 7 °ग्मु सु) महद्वन —After 12[ab], D2 4 5 7 ins

1174* यमुनावनमित्येव ख्यात दृष्टिमनोहरम् ।
तदतीत्य वन रम्य नानाशकुनिनादितम् ।
ददृशु पद्मगहन तडाग बहुपुष्करम् ।
तत्र चास्वाद्य पानीय मृणालान्पुष्कराणि च ।

कौसल्यां चैव पश्येयं सुमित्रां च यशस्विनीम् । इति सीताञ्जलिं कृत्वा पर्यगच्छद्वनस्पतिम् ॥ १३

सुविश्रान्ता॰ पुनर्जग्मुस्ताहन शसितव्रता । [5]
तत प्रकृष्टमध्वान गत्वा सकथया सुखम् ।

[(l 1) D4 -यानम् (for -वनम्) —(l 2) D4 7 सर्वं (for रम्य) D5 नानानुलनिनादित (for the post half) —(l 3) D4 7 पञ्चगभीर —(l 4) D2 सम्यानि, D5 सस्वाघ (for चास्वाघ) D2 5 मृणान —(l 5) D5 सविश्राता पुनर्जग्मुस्तद्वन सशितमना —(l 6) D2 प्रकृनम्, D5 प्रहृष्टम् D2 सकथया (meta), D5 मगतया]

—^{cd}) D2 आसेंद्र , D4 7 आसाद्य (for आसेदु) D4 ददृशुर् ; D7 जहृषुर् (for शीतल) Ś1 Ñ2 V1 B D1 3 6 M4 शी(Ñ2 D1 मी)तच्छाय(V1 B3 °च्छाया, D6 °छाया) समासेदु (D1 °सीदु) श्याम(D3 °म) न्यग्रोधपादपं —After 12, Dg1 Dt1 Dd1 Dm1 D2 4 5 7 T G M1–3 ins

1175* न्यग्रोध तमुपस्थाय वैदेही वाक्यमब्रवीत् ।
नमस्तेऽस्तु महावृक्ष पारयेन्मे पतिर्व्रतम् ।

[(l 1) Dg1 Dt1 Dd1 Dm1 T G3 त(Dt1 Dm1 स) मुपागम्य, D4 7 तदुपास्थाय, D5 M2 3 तमुपास्थाय Dt1 चाभ्यवदत, Dd1 Dm1 त्विदमब्रवीत् (for वाक्यम°). —After l 1, D5 reads 13^{cd} for the first time, repeating it in its proper place —(l 2) D2 4 5 7 नमोस्तु ते, T2 नमस्ते सु-, T3 नमस्ने तु (for नमस्तेऽस्तु). Dt1 पतिर्व्रते, Dd1 T2 3 G1 °व्रत, G2 M1 व्रत पति (by transp), M2 वृत पति , Cm as above. D2 5 शिवो नो भव दर्शने, D4 7 शिव नस्तव दर्शने (for the post. half)]

—D2 4 5 7 cont

1176* चतुर्दशसु वर्षेषु व्यतीतेषु वने सुखम् ।
अयोध्या सर्वसामग्र्या प्रविशेम पुन पुरीम् ।

—Thereafter D5 cont 1178*

13 M4 om 13^{ab} Ś1 V1 B D1 3 6 transp 13^{ab} and 13^{cd} —^{a}) V1 om , D1 3 5 अपि (for चैव) Ś1 Ñ2 V1 B D1 3 5 6 जीवन्तीं, Dg1 Dt1 Dm1 D2 T3 M3 पश्येम(D2 °म), Dd1 D4 7 पश्याम , G1 पश्यामि (for पश्येयं) —^{b}) M3 मनस्विनीं Ś1 Ñ2 V1 B D1 3 6 पश्ये(V1 °ये)यमिति मैथिली(B2 मे मति), D2 4 5 7 सर्वाश्च(D5 पश्येय) ज्ञा (D7 जा)तिबान्धवान् —After 13^{ab}, Ś1 Ñ2 V1 B D1 3 6 ins , M4 ins l 2 only after l. 1 of 1178*

1177* ययाचे त ततोऽभ्येत्य द्रुम सत्योपयाचनम् ।
प्रदक्षिणमुपावृत्य ततस्ने प्रययु पुन ।

[(l 1) Ś1 Ñ2 ययाचेद, V1 D1 ययाच त, B1 यया चेत्, B4 ययाचैन V1 तद् * त्य, D1 3 ततश्चैत्य, D6 °भृत्ये (sic) (for ततोऽभ्येत्य) Ñ2 B1 3 श्याम, D3 भ्रुव (for द्रुम) Ś1 D6 न्यग्रोध सत्पपा(D6 °पा)चन (for the post. half) —(l 2) D3 6 उपावृत्त (sic) Ś1 D6 तदा (for पुन). D1 3 ततस्ते(D3 °स्त) त ययु शुभ (for the post half).]

—D5 repeats here 13^{cd} (cf v l 1175*) —^{c}) Ś1 Ñ2 B D6 अर्चयित्वा च(Ñ2 B °य) त सीता, V1 D1 5(first time) M4 त सीताभ्यर्च्चयित्वाग्रे(D5 °र्च्य यत्नेन), D2 4 5 (second time) 7 इत्यजलि(D4 °लि)कृत्य(D2 5 °त्वा) सीता, D3 सीता तमर्चयित्वाग्रे —^{d}) Dd1 पर्यपृच्छद् , T1 2 प्रत्य°, Cv r m g k t as in text (for पर्यगच्छद्) Ś1 Ñ2 B1–3 D3 याचतेद कृताजलि , V1 B4 D1 5(first time) 6 M4 ययाचेदं कृताजलि॰, D2 5(second time) त ययाचे वनस्पतिं, D4 7 ययाचे ता(D7 त) वनस्पति

—After 13, Ś1 Ñ2 V1 B D1 3 6 M4 ins , while D5 cont after 1176*

1178* चिर जीवतु मे वृद्ध श्वशुर कोसलेश्वर ।
भर्ता मे देवराश्चैव जीवन्तु भरतादय ।

[M4 om l 2 —(l 2) Ñ2 V1 B1 3 D1 6 देवरश्च] whereas D2 4 5 7 ins after 13

1179* क्रोशमात्र ततो गत्वा भ्रातरौ रामलक्ष्मणौ ।
प्रसन्नसलिला दूराद्ददृशुर्यमुना नदीम् ।

—D2 4 5 7 cont , while Dg1 Dt1 Dd1 Dm1 T G M1–3 ins after 13.

1180* अवलोक्य तत सीतामायाचन्तीमनिन्दिताम् ।
दयिता च विधेया च रामो लक्ष्मणमब्रवीत् ।
सीतामादाय गच्छ त्वमग्रतो भरतानुज ।
पृष्ठतोऽहं गमिष्यामि सायुधो द्विपदा वर ।
यद्यत्फल प्रार्थयते पुष्प वा जनकात्मजा । [5]
तत्तत्प्रदद्या वैदेह्या यत्रास्या रमते मन ।
गच्छतोस्तु तयोर्मध्ये बभूव जनकात्मजा ।
मातगयोर्मध्यगता शुभा नागवधूरिव ।
एकैक पादपं गुल्म लता वा पुष्पशालिनीम् ।
अदृष्टपूर्वां पश्यन्ती रामं पप्रच्छ साबला । [10]
रमणीयान्बहुविधान्पादपान्कुसुमोत्करान् ।
सीतावचनसरब्ध आनयामास लक्ष्मण ।
विचित्रवालुकजला हससारसनादिताम् ।
रेमे जनकराजस्य सुता प्रेक्ष्य तदा नदीम् ।

[(l 1) D2 4 5 7 तीरे तिष्ठन्परतप॰ G1 याचती तामनिंदिता, M1 अयाती तामनिंदितां (for the post half) —(l 2) D2 4 5 7 दयित च विधेय च (for the prior half) —(l 3) D7 अग्रतौ Dg1 T1 2 G1 2 M1–3 भरताग्रज ❀ Cv m g. भरताग्रजेति बहुव्रीहि ।, Cr भरतानुजेति बहुव्रीहि । ❀ —(l 4) Dt1 Dd1 Dm1 [s]नु- (for Sहं) Dd1 सायुधा D2 4 5 7 धन्विना वर(D5 °र) (for द्विपदा वर) —D2 4 5 7 om. l 5–6 —T3 om (hapl) l 6–7 —(l 6) M3 तत (for तत्तद्) Dg1 M3 प्रदद्याद्, Dt1 Dd1 Dm1 प्रयच्छ Dg1 वैदेह्यै G3 यत्रान्या —Dt1 om l 7–8 —(l 7) D2 4 5 7 हि (for तु) G2 M1 बभौ च (for बभूव) —(l 9) D5 पुष्पशोभिनीं —(l. 10) Dg1 अदृष्टपूर्वां, Dt1 °रूप, Dd1

क्रोशमात्रं ततो गत्वा भ्रातरौ रामलक्ष्मणौ ।
बहून्मेध्यान्मृगान्हत्वा चेरतुर्यमुनावने ॥ १४
विहृत्य ते बर्हिणपूगनादिते
शुभे वने वारणवानरायुते ।
समं नदीवप्रमुपेत्य संमतं
निवासमाजग्मुरदीनदर्शनाः ॥ १५

इति श्रीरामायणे अयोध्याकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

Dm1 °रूपा, D2 4 7 °पूर्व, G M1 °पूर्वान् M3 राम प्रव्रज (for राम पप्रच्छ) D2 4 5 7 जानकी (for साबला) —D2 4 5 7 om l 11 —(l 11) M3 रमणीय- Dm1 T2 3 G M1–3 कुसुमोत्कटान्, Ct °त्करान् (as above) —(l 12) Dt1 -वचन T3 -सरभ्धम —(l 13) G2 M1 विचित्रवालुका नीला (for the prior half) —(l 14) T1 moth-eaten for रेमे जनक T3 om प्रेक्ष्य M3 सदा (for तदा) K(ed) transp सुता and तदा]

14 [b]) Ś1 Ñ2 V1 B1 3 4 D1 3 6 M4 नीलमासाद्य तद्वन, B2 नील वनमपश्यता —After 14[ab], D2 4 5 7 ins

1181* ददृशुर्मृगसघातान्सलिलार्थमुपागतान् ।
[D4 7 इहागतान्]

—[c]) Ś1 Ñ2 V1 B D1 3 6 M4 हत्वा तत्र मृग मेध्य(V1 मध्ये [meta]), D2 4 5 7 तत्र हत्वा मृगान्काश्चिद् —[d]) Ś1 Ñ2 B D6 स्ना(Ś1 D6 श्रु)त्वा त(B2 स)मुपभुज्य(Ś1 °योज्य, B3 D6 °युज्य, B4 °हाद्य) च, V1 D1 3 M4 पक्त्वा भुक्त्वा च राघवौ, D2 4 5 7 विविक्ते यमुनातटे —After 14, D2 4 5 7 ins

1182* श्रान्तामालोक्य वैदेहीं तत्र वास प्रचक्रिरे ।

[D2,5 वास तत्रैव चक्रिरे (for the post half)]

15 [a]) D4 5 ~विगाह्य Dm1 -कूज- (for -पूग-) D4 5 7 -नादित —[b]) Dg1 T2 3 G2 3 M1 2 वानरवारणायुते (by transp), M3 वावरवारमायुते (sic) D4 5 7 शुभ वन वानरवारणा(D5 °नरी)युत —[c]) T3 समुन्नदीवप्रम् Dt1 Dd1 Dm1 सत्वर, Cg as in text (for समत) —[d]) Dd1 अदीनदर्शन, D5 अदीनसत्त्व —For 15, Ś1 Ñ2 V1 B D1–3 6 M4 subst, D5 ins after 15

1183* विहृत्य तस्मिन्बहुपक्षिनादिते
वने यथेष्ट बहुयूथसेविते ।
ततो निवासार्थमुपाययु शिव
शुभ नदीतीरतट समुच्छ्रितम् ।

[(l 1) B3 4 विकृत्य Ś1 (marg) B1 D5 M4 -पक्ष- (for -पक्षि-) B1 -नादितो —(l 2) Ś1 D6 बहुमत्त्व-, V1 B2 4 D1–3 5 मृगयूथ- D5 -पायने —(l 3) V1 मम, B2 D1–3 6 शुभ (for शिव) —(l 4) Ñ2 B -तरु (for -तट) V1 समन्वित, B4 D1 समुत्थित Ś1 D3 6 ममुच्छ्रित(D6 °त्थित) द्रुम(D3 वट) (for -तट समुच्छ्रितम्)]

Colophon —*Sarga name* Ś1 Ñ2 B D2 4–7 यमुनातीर(Ñ2 °पर, B3 °पार, D5 °**)नि(B1 om)वास, V1 D1 यमुनातीरगमन, D3 यमुनातीराभिगमन —*Sarga no* (figures, words or both) B1 4 D3 om, Ś1 59, Ñ2 D4 54, V1 Dg1 Dt1 Dd1 Dm1 D7 S 55, B2 44, B3 53, D1 111, D2 5 58, D6 56 —After colophon, D6 concludes with रामाय नम, T2 श्रीरामचन्द्राय नम, G श्रीरामाय नम

५०

अथ रात्र्यां व्यतीतायामवसुप्तमनन्तरम् ।
प्रबोधयामास शनैर्लक्ष्मणं रघुनन्दनः ॥ १
सौमित्रे शृणु वन्यानां वल्गु व्याहरतां स्वनम् ।
संप्रतिष्ठामहे कालः प्रस्थानस्य परंतप ॥ २
स सुप्तः समये भ्रात्रा लक्ष्मणः प्रतिबोधितः ।
जहौ निद्रां च तन्द्रीं च प्रसक्तं च पथि श्रमम् ॥ ३
तत उत्थाय ते सर्वे स्पृष्ट्वा नद्याः शिवं जलम् ।
पन्थानमृषिणोद्दिष्टं चित्रकूटस्य तं ययुः ॥ ४
ततः संप्रस्थितः काले रामः सौमित्रिणा सह ।
सीतां कमलपत्राक्षीमिदं वचनमब्रवीत् ॥ ५
आदीप्तानिव वैदेहि सर्वतः पुष्पितान्नगान् ।
स्वैः पुष्पैः किंशुकान्पश्य मालिनः शिशिरात्यये ॥ ६

50

☞ Ñ1 missing for Sarga 50 (cf v l 1058*) Ś1 begins with ॐ, M1 2 श्रीरामाय नम

1 ^{a}) B1 अत्र (for अथ) Ś1 D6 रात्रौ (for रात्र्या) T3 M3 अतीतायाम् —^{b}) Ś1 Ñ2 (m) B D6 सुख(B4 °ख)सुप्त, Dg1 अनुसुप्त, Cg as in text (for अव°) Ś1 Ñ2 B D4 6 7 श्रमालस(B4 °लुप [sic]), V1 D1–3 M4 श्रमान्वित (for अनन्तरम्) —^{c}) G2 M1 बोधयामास शनकैर् —^{d}) Dt1 रघुपुगव (for °नन्दन) —For 1^{cd}, Ś1 Ñ2 V1 B D1–7 M4 subst

1184* राम उत्थापयामास लक्ष्मण शनकैस्तदा ।

[Ś1 V1 D4–7 रामस्तु (for राम) V1 कुल्कैस्, M4 तु शनैस् (for शनकैस्) V1 B4 तथा (for तदा)]

2 B2 om 2^{ab} —^{a}) Ś1 Ñ2 V1 B1 3 4 D1–7 M4 खगाना शृणु सौमित्रे —^{b}) B1 वल्गु Ś1 Ñ2 V1 B1 3 4 D4 6 7 M4 वने, D1–3 5 वच (for स्वनम्) —^{c}) Ś1 Ñ2 V1 B D1 3 5 6 M4 भूयो, Dm1 D2 4 7 G1 कालं (for काल) —After 2^c, D5 ins

1185* यदि लक्ष्मण रोचसे ।
न निद्राया ग्रह(य) काल

—^{d}) Ś1 Ñ2 V1 B D1–3 6 M4 यदि लक्ष्मण मन्यसे

3 ^{a}) Ś1 V1 D1 ससुप्त, B1 Dt1 प्रसुप्त, T3 समस्त (for स सुप्त) Ś1 Ñ2 V1 B1 3 4 D1–7 M4 स(V1 स, B1 3 D2 3 5 6 सु)सुप्त, B2 सुसुप्तो, Dt1 तु ततो (for समये) V1 सीता, B1 M4 भ्राता —^{b}) Dt1 समये (for लक्ष्मण) —^{c}) Cg तद्रीं (as in text), Ct तद्रा Ś1 Ñ2 V1 B1–3 D1 3–7 M4 क्लम(D4 5 7 श्रम) चैव, B4 , चैव, Dg1 Dt1 Dd1 Dm1 च तद्रा च (for च तन्द्रीं च) D2 निद्राश्रम चैव —^{d}) Dt1 Dd1 Dm1 G3 परिश्रम (for पथि श्रमम्) Ś1 Ñ2 B D6 त चैवाध्व(D6 °थ)परिश्रम, V1 D1–5 7 तथाध्वान(D1 °ध्वान, D3 °ध्यान)परिश्रम, M4 त च यानपरिश्रम

4 ^{a}) G (ed) अथ (for तत). Ś1 सहसा, Ñ2 V1 B D1–7 M4 सहिता (for ते सर्वे) —^{b}) Ś1 Ñ2 V1 B D1–7 M4 स्पृष्ट्वा च सलिल शुचि(B2 बहु) —After 4^{ab}, Ś1 Ñ2 V1 B D1–7 M4 ins

1186* उपास्य च शिवा सध्या तत्रैवाभिप्रतस्थिरे ।

[Ś1 Ñ2 B D6 शुभा (for शिवा) V1 D1–3 [अ]थ (for [अ]भि-)]

—^{c}) Dt1 ऋषिभिर्जुष्ट, K(ed) ऋषिणाविष्ट —^{d}) M3 सययु (for तं ययु) —For 4^{cd}, Ś1 Ñ2 V1 B D1–7 M4 subst

1187* चित्रकूटस्य पन्थानमासाद्य कृतनिश्चया ।
तत्र वाम समुद्दिश्य ययु शीघ्रपराक्रमा ।

[(l 1) D5 अध्यास्य (for आसाद्य) D1 3 6 M4 कृतनिश्चय. —(l 2) D6 ततो (for तत्र) D1 3 ययौ, M4 तत (for ययु) D1 3 6 (before corr as above) M4 शीघ्रपराक्रम]

5 ^{a}) Dg1 सप्रस्थिते —For 5, Ś1 Ñ2 V1 B D1–7 M4 subst

1188* अचिरेण समासाद्य ततस्तं चित्रपादपम् ।
चित्रकूटवन राम सीता वचनमब्रवीत् ।

[(l 1) Ś1 Ñ2 B तत्, D6 तश् (sic) (for त). —(l. 2) D2 4 5 7 M4 चित्रकूट ततो (for °कूटवन)]

6 ^{a}) M3 सुदीप्तान् M1 इह (for इव) Dt1 Dm1 G1 3 M3 वै(M3 ˇ)देही —^{b}) T2 G1 3 द्रुमान् (for नगान्) —^{c}) M2 पश्यै (corrupt) (for पुष्पै) Dg1 शिशुकान् —Dg1 reads 6^d in marg —^{d}) G3 मलिन, M1 मौलिन, Cv °निन·, Cm g k t as in text (for मालिन) —For 6, Ś1 Ñ2 V1 B D1–7 M4 subst

1189* पश्यैतान्पुष्पितान्सीते मालिनीं सरितं प्रति ।
शिशिरात्ययदग्धाग्नि प्रदीप्तानिव किंशुकान् ।

[(l 1) Ñ2 B1–3 [आ]म्रान्, D5 [अ]मून्, D7 [इ]मान् (for [ए]तान्) D4 om (hapl)पुष्पितान् B4 पश्याम पुष्पिते सीते (for the prior half) Ñ2 मानिनीं (for मालिनीं) —(l 2) D6 सदग्धान् (for -दग्धाग्नि) Ñ2 V1 B D1–3 5 M4 शिशिरात्यये विशालाक्षि(Ñ2 B1–3 च[B2 3 तु]दीर्घाक्षि) (hypm), D4 7 शिशि(D7 om [hapl]शि)रात्यये पद्माक्षि (for the prior half) D3 इह (for इव)]

—Then all the above MSS cont .

पश्य भल्लातकान्फुल्लान्नरैरनुपसेवितान् ।
फलपत्रैरवनतान्नूनं शक्ष्यामि जीवितुम् ॥ ७
पश्य द्रोणप्रमाणानि लम्बमानानि लक्ष्मण ।
मधूनि मधुकारीभिः संभृतानि नगे नगे ॥ ८
एष क्रोशति नत्यूहस्तं शिखी प्रतिकूजति ।
रमणीये वनोद्देशे पुष्पसंस्तरसंकटे ॥ ९
मातंगयूथानुसृतं पक्षिसंघानुनादितम् ।
चित्रकूटमिमं पश्य प्रवृद्धशिखरं गिरिम् ॥ १०
ततस्तौ पादचारेण गच्छन्तौ सह सीतया ।
रम्यमासेदतुः शैलं चित्रकूटं मनोरमम् ॥ ११

1190* कर्णिकारवनं चापि पश्य मन्दाकिनीमनु ।
दीपितं रुचिरैः पुष्पैः प्रदीप्तैः काञ्चनैरिव ।

[(l 1) V1 D1-5 7 चारु, M4 चात्र (for चापि) —(l 2) V1 D1 3 शोभित D5 दीपितैर्, D6 दीप्तित (for दीपित) Ñ2 B3 रुचिर D4 5 7 M4 वृक्षै (for पुष्पै) D1 3 प्रदीपै, D4 प्रदीप्त B4 + । र् (for काञ्चनैर्)]

7 a) B3 भल्वातकान्, D1 भिल्लवातिकान् (hypm), D6 भैल्ल°, T2 3 पल्ला°, G1 फुल्ला°, G3 फल्ला°, Cv भल्ल°, Cg k as in text (for भल्लातकान्) Ś1 Ñ2 V1 B Dg1 Dt1 Dd1 Dm1 D1 3-7 T3 G2 M विल्वान्, D2 सीते (for फुल्लान्) —b) G1 3 उपनिषेवितान् (for अनुपसे°) Ś1 Ñ2 V1 B D1-7 M4 पनसा(B3 °लाशा)स्तिदु(Ñ2 B3 4 स्तिल, D7 स्ताडु) कास्तथा(D2 4 5 7 कानपि), G2 M1 वानरैरुपशोभितान —c) Dt1 Dd1 Dm1 फलपुष्पैर् —d) Dg1 Dt1 Dd1 Dm1 T1 2 M2 Cv r t शक्ष्याम, Cm g k °मि (as in text) Dt1 जीवित —For 7cd, Ś1 Ñ2 V1 B D1-7 M4 subst

1191* फलभारनताश्चैव तथान्यान्फलपादपान् ।

[B1 3 4 D3 फलभारानताश्, D4 7 फलभारनतेश् V1 D1-5 7 M4 [अ]पि (for [ए]व) Ś1 D6 शुभपादपान् D4 5 7 वानरैरु (D5 नरैरनु)पसेवितान् (for the post half)]

—Then all cont

1192* शक्यमत्र फलैरेव जीवितुं तनुमध्यमे ।
अहो स्वर्गोपमं प्राप्ताश्चित्रकूटमिमं वयम् ।

[(l 1) D4 5 7 एभि (for अत्र) D6 एव (for एव) Ñ2 जीवित —(l 2) V1 चित्रकूटवन, D4 7 चित्रकूटमिद Ñ2 B3 वन, D4 शुभ (for वयम्)]

8 a) D1 यस्य (for पश्य) B3 लोलप्रणामानि (meta) —b) D1 लवमानि च लक्ष्मण (sic) —c) Ś1 B3 D6 M4 चितानि, Ñ2 B1 2 4 चित्राणि (for मधूनि) Ś1 Ñ2 V1 B D1-3 6 M4 चित्रकूटेऽस्मिन, D4 5 7 मधुमासेऽस्मिन् (for मधुकारीभि) —d) D1 ससृतानि, D5 सपूर्णानि, T2 सुभृतानि (for संभृतानि) D1 नगे वने, D2 3 नगोत्तमे(D3 °मै) (for नगे नगे) Ś1 Ñ2 B1-3 D6 M4 मधूनि मधुपैः खगैः, B4 न व्यूढानि मधुव्रतै

9 a) Ś1 Ñ2 V1 B D1-7 M4 असौ(D4 5 7 एष) कूजति, Dm1 एव क्रोशति Ś1 Ñ2 V1 B Dg1 Dd1 Dm1 D1-7 दात्यूहस्, Cm g as in text (for न°) —After 9ab, Ś1 Ñ2 V1 B D1-7 M4 ins

1193* त चोपहसतीवाय कूजन्त जलकुक्कुट ।
परपुष्टरुत श्रुत्वा गायन्त इव कानने ।
भ्रमरा विचरन्त्येते पुष्पपानकलस्वना ।

[(l 1) Ś1 D6 कूजश्च, D4 5 7 कूनन्वे (for कूनन्त) Ñ2 (in also as above) B1 जलकुक्कुभ, D1 2 5 जल्कुर्कुट —(l 2) D4 7 ज्ञात्वा (for श्रुत्वा) Ñ2 reads इव in marg D4 5 7 नानातरुगणेषु वै(D4 च) (for the post half) —D4 5 7 om from l 3 up to st 10 —(l 3) M4 पुष्पाहारकल° (for the post half)]

—cd) Ś1 Ñ2 V1 B D1-3 6 M4 पश्य मदाकिनीतीरे कुसुमप्रकरैः प्रिये —After 9, Ś1 Ñ2 V1 B D1-3 6 M4 ins

1194* रचितानीव सुश्रोणि शयनानि द्रुमे द्रुमे ।
शिलातलानि चेमानि विमलानि शुचिस्मिते ।
लतावितानैश्छन्नानि पश्य रम्याणि भामिनि ।

[(l 1) Ś1 D6 वितानानीव शुभ्राणि (for the prior half) V1 om शयनानि D3 om (hapl) second द्रुमे —(l 2) Ś1 D6 नीलानि, B4 चेतानि (for चेमानि) Ñ2 विपुलानि, V1 D1-3 विशालानि (for विमलानि) —(l 3) Ñ2 B2 D1 लतावतानश्(D1 °नैश्), B1 3 4 लतावितानश्, M4 लताप्रतानैश् Ś1 D6 लतावृक्षाश्रितानीह (for the prior half) Ñ2 V1 B भाविनि (for °मिनि)]

10 D4 5 7 om 10 (cf v l 9) —c) G2 M1 बहुमूलफल पश्य —For 10, Ś1 Ñ2 V1 B D1-3 6 M4 subst

1195* मातगयूथनिचिते नानाविहगनादिते ।
नानामृगगणाकीर्णे शैलेऽस्मिन्रम्यकानने ।

[(l 1) Ś1 यूथविचिते, V1 D1 3 M4 -यूथानुसृते, D2 -यूथानुवृते B4 नादृते (sic), D2 -नाहिते (sic) (for -नादिते) —(l 2) V1 D1 2 -द्रुमसमाकीर्णे, M4 -द्रुमलताकीर्णे]

—Thereafter all the above MSS (except D3) cont, while D4 5 7 ins after l 2 of 1193* (owing to omission)

1196* वैदेहि विचरिष्याम सुखमत्र वय प्रिये ।
इह प्राप्स्यसि वैदेहि मया सह रतिं शुभाम् ।

[(l 1) B4 विहरिष्याम D4 5 7 प्रिये वय (by transp) —(l 2) Ś1 D4-7 परा रतिं(Ś1 D6 गतिं), V1 D1 M4 रतिं परा, D2 रतिंप्रिये (for रतिं शुभाम्)]

11 b) G2 M1 सीतया सह (by transp) —For 11, Ś1 Ñ2 V1 B D1-7 M4 subst

19 तं तु पर्वतमासाद्य नानापक्षिगणायुतम् ।
13 अयं वासो भवेत्तावदत्र सौम्य रमेमहि ॥ १२
19 लक्ष्मणानय दारूणि दृढानि च वराणि च ।
कुरुष्वावसथं सौम्य वासे मेऽभिरतं मनः ॥ १३

तस्य तद्वचनं श्रुत्वा सौमित्रिर्विविधान्द्रुमान् ।
आजहार ततश्चक्रे पर्णशालामरिंदमः ॥ १४
शुश्रूषमाणमेकाग्रमिदं वचनमब्रवीत् ।
ऐणेयं मांसमाहृत्य शालां यक्ष्यामहे वयम् ॥ १५

1197* अवेक्षमाणा एव ते रम्या मन्दाकिनीं नदीम् ।
चित्रकूट समाजग्मुर्नानाकुसुमितद्रुमम् ।

[(l. 1) Ś1 B3 अवेक्षमाणा V1 D1-5 7 M4 दृष्ट्वैव वीक्ष्य(D4 6 7 पश्य)माणास्ते (for the prior half). —(l. 2) M4 समागेदुर् (for समाजग्मुर्) B1 नानाकुसुमित द्रुम, D3 नानाकुसुममण्डित (for the post. half)]

12. b) G1 -पक्षिगणैर्युत —After 12ab, Dg1 Dt1 Dd1 Dm1 T G M1-3 ins.

1198* बहुमूलफल रम्य सपन्नसरसोदकम् ।
मनोज्ञोऽय गिरि सौम्य नानाद्रुमलतायुत ।
बहुमूलफलो रम्य स्वाजीव प्रतिभाति मे ।
मुनयश्च महात्मानो वसन्त्यस्मिञ्शिलोच्चये ।

[(l. 1) G1 2 M1 सप्रसन्नसरो(G1 °स्नो)दक, K(ed) सपन्न सरसोदक (for the post. half). —After l. 1, G1 ins.:

1198(A)* चित्रकूट हि सपश्यन्रामो लक्ष्मणमब्रवीत् ।

—(l. 3) M1 (before corr.) बाहुमूलफलो M2 मा (for मे). —(l. 4) G2 M1 महाभागा (for °त्मानो).]

—c) Dt1 तात (for तावद्). —d) Dg1 Dt1 T3 G2 M1 वयमत्र (for अत्र सौम्य) Dg1 रमामहे, Dt1 वसेमहि. —For 12, Ś1 Ñ2 V1 B D1-7 M4 subst.:

1199* तस्य शैलस्य पादे तु विविक्ते सलिलावृते ।
आश्रम चक्रतुर्वीरौ भ्रातरौ रामलक्ष्मणौ ।

[(l. 1) D4 5 7 पार्श्वे (for पादे) V1 D1 4 5 7 M4 [ऽ]थ, D2 3 च (for तु) V1 D1 M4 विविक्ते सलिलायुते, B1 विभक्ते सलिलावृते, B2 D3 विविक्तसलिलावृते, D2 विविक्ते च शिलायुते, D4 7 विचित्रकुसुमायुते, D5 विचित्रसलिलायुते (for the post. half). —(l. 2) Ś1 D6 चारु (for वीरौ) Ñ2 marg., B2 विविक्ता, D1 om. (hapl.) (for भ्रातरौ).]

—After 12, Dg1 Dt1 Dd1 Dm1 T G M1-3 ins.:

1200* इति सीता च रामश्च लक्ष्मणश्च कृताञ्जलि ।
अभिगम्याश्रम सर्वे वाल्मीकिमभिवादयन् ।
तान्महर्षि प्रमुदित पूजयामास धर्मवित् ।
आस्यतामिति चोवाच स्वागत त निवेद्य च ।
ततोऽब्रवीन्महाबाहुर्लक्ष्मण लक्ष्मणाग्रज । [5]
सनिवेद्य यथान्यायमात्मानमृषये प्रभु ।

[(l. 1) T1 2 G3 महामति (for कृताञ्जलि). —(l. 2) Dm1 [आ]श्रमे (for °म). —(l. 4) M2 होवाच Dm1 ते, T1 च, K(ed) तु (for त) G3 निशाम्य (for निवेद्य). —After l. 4, Dm1 ins.:

1200(A)* राघव प्रीतिमयुक्तमिद वचनमब्रवीत् ।
ज्ञात मया रघुश्रेष्ठ त्वदागमनकारणम् ।
अत्र वासमृषीणा च सकाशे रोचय प्रभो ।
इति तेन समाज्ञप्त प्रीयमाणो महारथ ।
तथेति प्रतिजग्राह ऋषिणोक्त कृताञ्जलि । [5]

—(l. 5) G1 महातेजा, M3 महाबाहु T3 लक्ष्मणाग्रज.]

13. D5 om. 13. —b) G1 वराणि च दृढानि च (by transp.). —c) G1 कुरुष्वावसथा(न्). —d) T3 वासा, G2 वासो G1 वसेमाभिमत मन: —For 13, Ś1 Ñ2 V1 B D1-4 6 7 M4 subst.:

1201* गजभग्नान्युपादाय दारूण्युपवनान्तरात् ।
लतावितानसंबद्धे द्वे चक्रतु सदने पृथक् ।

[(l. 1) Ś1 B1 2 D1 6 7 [उ]पाहृत्य, B4 °हृत्य (for °दाय) V1 D1-4 7 M4 [अ]थ (for [उ]प-). —(l. 2) Ñ2 लतावनद्धे च ततश्, V1 °लग्ने द्वे, B2 °वने तु, B3 4 D1 4 लतावितानबद्धे द्वे (B3 च), D2 3 °नद्धे द्वे, M4 लताप्रताननद्धे द्वे (for the prior half) Ñ2 B3 चक्रतु शयने, V1 D1-4 शरणे चक्रतु, B1 4 M4 चक्रतु शरणे D7 प्रतानबद्धे द्वे शरणे(णे) चक्रतुर्स्तौ पृथक् (subm.)]

14. b) T2 3 सौमित्रीन् (sic). —For 14, Ś1 Ñ2 V1 B D1-7 M4 subst.:

1202* वृक्षपर्णैश्च बहुभिश्छादयामासतुस्तत ।
ते पर्णशाले कृत्वाथ शोधयामास लक्ष्मण ।

[(l. 1) V1 D1 3 बृ(V1 व)हद्भिस्तौ, D2 4 5 7 M4 महद्भिश्च (M4 °स्ता) (for च बहुभिश्) B4 छादयामास लक्ष्मण (for the post. half). —(l. 2) B1 तु, D5 च (for [अ]थ).]

—Then all cont.:

1203* मृदोपलेपन चक्रे वैदेही तनुमध्यमा ।
[B4 मृदोप [illegible]न, D3 मृद्गपलेपन]

—After 14, Dg1 Dt1 Dd1 Dm1 T G M1-3 ins.:

1204* ता निष्ठिता बद्धकटा दृष्ट्वा राम सुदर्शनाम् ।

[Dg1 निविष्टा (for निष्ठिता) T2 G2 निष्ठितावद्धकटा ⊛ Cm. t. बद्धकटा बद्धकवाटाम् । छान्दसो वर्णलोप । ⊛ G1 सुदर्शन]

15. For 15, Ś1 Ñ2 V1 B D1-7 M4 subst.:

1205* कृत्वाश्रमपद रामस्ततो लक्ष्मणमब्रवीत् ।
मृगमाहृत्य सौमित्रे चरु श्रपय माचिरम् ।
तेन यष्टुमिहेच्छामि चरुणाश्रमदेवता ।

[(l. 1) D4 5 7 दृष्ट्वाश्रमपदे(D5 °द). —(l. 2) Ś1 D5 आहृत्य, Ñ2 आकृष्य (for आहृत्य) D2 रिच (meta.) (for

स लक्ष्मणः कृष्णमृगं हत्वा मेध्यं प्रतापवान् ।
अथ चिक्षेप सौमित्रिः समिद्धे जातवेदसि ॥ १६
तं तु पक्वं समाज्ञाय निष्टप्तं छिन्नशोणितम् ।
लक्ष्मणः पुरुषव्याघ्रमथ राघवमब्रवीत् ॥ १७

अयं कृष्णः समाप्ताङ्गः शृतः कृष्णमृगो यथा ।
देवता देवसंकाश यजस्व कुशलो ह्यसि ॥ १८
रामः स्नात्वा तु नियतो गुणवाञ्जप्यकोविदः ।
पापसंशमनं रामश्चकार बलिमुत्तमम् ॥ १९

चिरम्) —(l 3) Ś1 B3 D3 5 वर(B3 लक्ष्म)णाश्रमदेवता (for the post half)]

—After 15, Dg1 Dt1 Dd1 Dm1 T G M1–3 ins

1206* कर्तव्य वास्तुशमन सौमित्रे चिरजीविभि ।
मृग हत्वानय क्षिप्र लक्ष्मणेह शुभेक्षण ।
कर्तव्य शास्त्रदृष्टो हि विधिर्धर्ममनुस्मर ।
भ्रातुर्वचनमाज्ञाय लक्ष्मण परवीरहा ।
चकार च यथोक्त स त राम पुनरब्रवीत् । [5]
ऐणेय श्रपयस्वैतच्छाला यक्ष्यामहे वयम् ।
त्वर सौम्य मुहूर्तोऽय ध्रुवश्च दिवसो ह्ययम् ।

[(l 1) T2 G1 2 M1 चिरवासिभि, Cg t as above (for °जीविभि) —(l 3) T2 वा, T3 om (subm) (for हि) T2 विधिधर्मम् Dg1 Dm1 T2 M2 (before corr) अनुसरन्, Cm g k as above —(l 4) T3 M3 आस्थाय (for आज्ञाय) —(l 5) Dt1 हि (for स) K(ed) म यथोक्त च G1 राम (sic) —(l 6) Dg1 श्रपयस्वाय —(l 7) G1 ध्रुव K(ed) [ऽ]पि (for हि) G1 2 [अ]द (for [अ]यम्)]

16 For 16, Ś1 Ñ2 V1 B D1–7 M4 subst

1207* इत्युक्तो लक्ष्मणो भ्रात्रा हत्वा कृष्णमृग वनात् ।
आहृत्य जनयित्वाग्नि श्रपयामास सस्कृतम् ।

[(l 1) B1 D5 भ्राता D3 सह (for हत्वा) Ś1 D4–7 वने (for वनात्) —(l 2) B3 आकृत्य (for आहृत्य) Ś1 D4.6 7 चानयित्वा, Ñ2 B2–4 ज्वा(B2 3 ज्व)ल° (for जनयित्वा) D3 जन- * ग्नि Ś1 D1 4–7 त चरु (for सस्कृतम्) D2 त्रपयामास (sic) सत्कृत (for the post half)]

17 ^{a}) Dt1 तत् (for त) T1 स विज्ञाय (for समा°) —^{b}) T2 छिन्नशोभित, G1 छन्न° (for °शोणितम्) —For 17, Ś1 Ñ2 V1 B D1–7 M4 subst

1208* त मृग सस्कृत कृत्वा सुनिष्टप्त च लक्ष्मण ।
उवाच राममभ्येत्य कृताञ्जलिरिद वच ।

[(l 1) M4 मृत (for मृग) Ñ2 B3 श्रपित, V1 B2 D5 सुश्रित, B1 4 D1–3 M4 सुश्रुत (for सस्कृत) Ś1 D4 6 7 सुपक्व, Ñ2 B3 °स्तप्त, B4 सुमिष्ट (subm), D3 सुनिष्टस्त (sic), M4 सुनिविष्ट (for सुनिष्टप्त) —(l 2) Ñ2 कृताञ्जलिम्]

18 ^{a}) Dt1 Ct सर्व (for कृष्ण) Dt1 Dm1 M1 (*inf lin sec m* also) समस्ताग, T3 समाप्ता च (for समाप्ताङ्ग) —^{b}) Dt1 Dd1 Dm1 श्रित (for शृत) Dt1 मया, Cm g as in text (for यथा) —^{c}) Dg1 Dd1 Dm1 T3 G M1 देवता —For 18, Ś1 Ñ2 V1 B D1–7 M4 subst

1209* आज्ञया ते मयाहृत्य शृत कृष्णमृगो वनात् ।
यष्टुमर्हसि तेन त्वं देवता अभिकाङ्क्षिताः ।

[(l 1) V1 वचनात् (for आज्ञया) B3 मयाकृत्य, D4 7 समा° (for मयाहृत्य) B2 D5 श्रित, D3 कृत, D4 7 श्रित (for शृत) Ś1 B3 कृष्णो मृगो, D4 7 कृष्ण मृग(D7 क्षुन [sic]) (for कृष्णमृगो) —(l 2) D7 येन (for तेन) V1 अपि काक्षिता, D1–5 7 M4 ह्यभि°]

19 ^{a}) G1 [अ]थ (for तु) —^{b}) Dt1 जपकोविद —After 19^{ab}, Dg1 Dt1 Dd1 Dm1 T G M1–3 ins

1210* सग्रहेणाकरोत्सर्वान्मन्त्रान्सत्रावसानिकान् ।
इष्ट्वा देवगणान्सर्वान्विवेशावसथ शुचि ।
बभूव च मनोह्लादो रामस्यामिततेजस ।
वैश्वदेवबलि कृत्वा रौद्र वैष्णवमेव च ।
वास्तुसशमनीयानि मङ्गलानि प्रवर्तयन् । [5]
जप च न्यायत कृत्वा स्नात्वा नद्या यथाविधि ।

[(l 1) Dd1 विग्रहेण (for स°) —(l 2) Dd1 दृष्ट्वा (for इष्ट्वा) Dm1 T1 2 G1 M2 वर्मात, G2 M1 सदन (for [आ]वसथ) G2 शुचि —(l 3) G2 वचनोह्लादो (for च मनो°) —(l 5) M3 वास्तस्य (for वास्तुस-) T3 G2 वास्तुशम (meta)मनीयानि —(l 6) Dg1 जप्य (for जप)]

—For 19, Ś1 Ñ2 V1 B D1–7 M4 subst

1211* इत्युक्तो राघव स्नात्वा जप्त्वा च विधिवत्तदा ।
इध्माग्नि मन्त्रवत्तत्र ततस्तज्जुहुवे हवि ।
हविर्हुत्वा च देवेभ्य पितृभ्यस्तदनन्तरम् ।
निर्वपाप पवित्रेषु निवाप सजलाञ्जलिम् ।
न्युप्य चैव निवाप त भूतेभ्योऽपि विधानत । [5]
चकार बलिनिर्वाप राघवस्तदनन्तरम् ।

अप्रहृष्टमनुष्या च दीननागतुरंगमा ।
आर्तस्वरपरिम्लाना विनिःश्वसितनिःस्वना ॥ १२
निरानन्दा महाराज रामप्रव्राजनातुरा ।
कौसल्या पुत्रहीनेव अयोध्या प्रतिभाति मा ॥ १३

1280* अत्रोद्यानानि शून्यानि प्रलीनविहगानि च ।
न चाभिरामानारामान्पश्यामि मनुजर्षभ ।

[(l 1) G1 अतो वनानि, G2 3 M1 पुरो(G3 तत्रो)द्यानानि Dm1 -विहगानि —(l 2) M3 [अ]मि॰ . . रामान्]

8 Dg1 om 8 —[a]) Dt1 Dd1 Dm1 T2 G3 अयोध्याया —[b]) G3 कश्चिन्मा नाभिनदति —[c]) Dm1 न राम समपश्यतो, M3 नरा राम न पश्यंतो —[d]) Dd1 T G M1–3 निश्वसति —For 8, Ś1 Ñ2 V1 B D1–7 M4 subst

1281* अयोध्या प्रविशन्त मा गर्हयन्ति समन्तत ।
पौरा हु त्वाभिसतप्ता विना राममुपागतम् ।

[B3 om l 1 and पौ in l 2 (cf v l 1279*) —(l 1) V1 B2 4 विगर्हति (for गर्हयन्ति) —M4 om l 2 —(l 2) B3 -[अ]ति-, D1 -[अ]भि- (for -[अ]भि) D2 उपागमत् (meta)]

—After 8, Dg1 Dt1 Dd1 Dm1 T G M1–3 ins

1282* देव राजरथ दृष्ट्वा विना राममिहागतम् ।
दु खादश्रुमुख सर्वो राजमार्गगतो जन ।

[(l 1) ꕥ Cv देव राजरथमित्यत्र देवेति सबुद्धि । ꕥ Cr m g t explain alike T1 damaged from वि up to मि G3 राघवम् (for राममिह) —(l 2) Dg1 uses nom plural for words in nom singular Dt1 दुराद्, G2 सर्वे (sic) B(ed) राजमार्गे]

9 Cf l 1 and 2 of 1232* in 2 51 15 —[d]) Dm1 (before corr as in text) T2 G2 रामदर्शन- (for रामा°) Dg1 -कर्षिता —For 9, Ś1 Ñ2 V1 B D1–7 M4 subst

1283* विमानहर्म्यप्रासादगवाक्षस्थाश्च योषित ।
उत्सृज्याभ्यागत राम मा दृष्ट्वा चुक्रुशुर्भृशम् ।

[(l 1) Ñ2 B -रथ्या- (for हर्म्य-) M4 [अ]पि (for च) —(l 2) Ñ2 B1–3 राममुत्सृज्य चायात, V1 D3 राम विसृज्यागत मा(D3 मा), B4 राममु॰ज्य मायात, M4 राममुत्सृज्यागत मा (for the prior half) Ñ2 V1 B D3 M4 दृष्ट्वा चुक्रुशुरातुरा, G(ed) दृष्ट्वा चुक्रुशुरातेवत् (for the post half)]

10 Cf l 3 and 4 of 1232* in 2 51 15 G3 illeg from विमलैर् in [a] up to 11 —[c]) T3 om मभिवीक्षन्ते —[d]) B (and Madras) (ed) [ऽ]व्यक्तम् —For 10, Ś1 Ñ2 V1 B D1–7 M4 subst

1284* अश्रुपूर्णेक्षणा दीना पश्यन्तो मामुपागतम् ।
हा नृशस क्व रामस्ते नीत इत्यपि चाब्रुवन् ।

[(l 1) M4 अश्रुपूर्णमुखा दीन (for the prior half) Ś1 D2 4 6 7 निरीक्षत(Ś1 °क्षतम्), V1 D1 3 5 M4 वीक्ष्यतो(D1 3 °त्यो, D5 °क्षतो, M4 °क्षत्यो) माम् (for पश्यन्तो माम्) —(l 2) Ś1 D2 6 ते राम (by transp), B4 रामोसौ, D4 7 वै रामो, D5 नो रामो (for रामस्ते) B3 D1 [अ]मि (for [अ]पि) Ś1 B4 D6 स(B4 ते) नीत इति (for नीत इत्यपि) D2 4 5 7 त्वया नीत इति प्रभो (for the post half)]

11 G3 illeg (cf v l 10) —[a]) D3 नामात्राणा (sic) T1 damaged for णा न मि D4 7 न मित्राणाममित्राणा —[b]) Ś1 Ñ2 V1 B D1–7 नोदासीन- (for उदा°) —[c]) B4 अथार्ततया (subm) Ñ2 B1 D1–4 7 T3 G2 M किंचिद् (for कचिद्) —[d]) Ś1 Ñ2 V1 B2–4 D1–7 G1 M2 4 उप (G1 अभि)लक्षये, Ct as in text (for नोप°)

12 D3 om 12 —[b]) Dg1 -नाद- (for -नाग-) —[c]) Dt1 -परिम्लान , M3 परिग्लाना —G3 damaged from [d] up to नन्दा in 13[a] —[d]) Dt1 Dd1 Dm1 S(except M4) विनिश्वसितनिस्वना —For 12, Ś1 Ñ2 V1 B D1 2 4–7 M4 subst

1285* दीनातुरार्तपुरुषा प्रम्लानोपवनद्रुमा ।
परिदेवितार्तकरुणा रुदितस्वननादिता ।

[(l 1) Ñ2 B3 D2 -पुरुषा D5 मम्लान- (sic) (for प्रम्लान-) Ñ2 B3 D1 2 4 -[उ]प(D1 [उ]पप [ditto])वनद्रुमा , V1 -[उ]पवनागना, B4 -[उ]शरनद्रुमा (sic) —(l 2) Prior half hypm D5 तु, D6 -[अ]त - (for -[आ]र्त-) Ñ2 B1–3 -स्वना(B1 °रा) (unmetrical), V1 B4 M4 -स्त(M4 स्व)निता, D5 रजनी (for करुणा) D7 om (hapl) तस्वननादि B2 ध्वनि , D4 -स्वर- (for -स्वन-) B2 D2 4 -नादिता]

13 [a]) G3 damaged up to नन्दा (cf v l 12). —G3 damaged from तुरा in [b] up to ने in [c] Note hiatus between [c] and [d] —[d]) G1 M2 (to avoid hiatus) ह्ययोध्या Dg1 Dt1 Dd1 मे, Dm1 मां (for मा) —For 13, Ś1 Ñ2 V1 B D1–7 M4 subst

1286* निरानन्दा निरुत्साहा निर्वपद्भारमङ्गला ।
रामप्रव्राजनार्तेय पुरी ते न विराजते ।

सूतस्य वचनं श्रुत्वा वाचा परमदीनया ।
बाष्पोपहतया राजा तं सूतमिदमब्रवीत् ॥ १४
कैकेय्या विनियुक्तेन पापाभिजनभावया ।
मया न मन्त्रकुशलैर्वृद्धैः सह समर्थितम् ॥ १५
न सुहृद्भिर्न चामात्यैर्मन्त्रयित्वा न नैगमैः ।
मयायमर्थः संमोहात्स्त्रीहेतोः सहसा कृतः ॥ १६
भवितव्यतया नूनमिदं वा व्यसनं महत् ।
कुलस्यास्य विनाशाय प्राप्तं सूत यदृच्छया ॥ १७
सूत यद्यस्ति ते किंचिन्मयापि सुकृतं कृतम् ।
त्वं प्रापयाशु मां रामं प्राणाः संत्वरयन्ति माम् ॥ १८
यद्यद्यापि ममैवाज्ञा निवर्तयतु राघवम् ।
न शक्ष्यामि विना रामं मुहूर्तमपि जीवितुम् ॥ १९

[(l 1) M4 [illegible] (for [illegible]) Ś1 D4 6 7 निरुत्साहा [illegible] (by transp) —(l 2) Ś1 Ñ2 B1 3 D4 -प्रव्रज (B1 °[illegible])[illegible] D2 4 5 7 [illegible] (for [illegible])]

14 [a]) T2 तस्य तद् (for सूतस्य) T1 damaged for वचनं —[b]) Dt1 Dd1 Dm1 G1 2 M1 2 राजा(Dt1 lacuna for जा) (for वाचा) Dg1 (before corr) -हीनया, Dt1 Dd1 Dm1 -दीनवत् (Dt1 lacuna for व) —[c]) Dt1 सूतम् ; Dd1 Dm1 G1 2 M1 2 वाचा (for राजा) —[d]) Dt1 इदं वचनम् (for तं सूतमिदम्) —For 14, Ś1 Ñ2 V1 B D1–7 M4 subst

1287* इत्येवमादि करुणं सुमन्त्रवचनं नृप ।
श्रुत्वोवाच ततो दीनो बाष्पगद्गदया गिरा ।

[(l 1) Ś1 D4 6 7 [illegible] (for नृप) —(l 2) Ś1 D4 6 7 नृपो (for ततो) Ñ2 B3 D2 4 7 -विह्वल(B3 °[illegible])या (for -गद्गदया) B1 2 D5 [illegible], B4 [illegible] (for the post half)]

15 [a]) T1 [क]भिनियुक्तेन, Cr m g as in text —[d]) G2 M1 सूत (for सह) Dd1 Dm1 सुमन्त्रित, M3 समर्पित —For 15, Ś1 Ñ2 V1 B D1–7 M4 subst

1288* मिथ्योपचारैः कैकेय्या वञ्चितेन कृतं मया ।
न मन्त्रितं विमृश्यैव धर्मज्ञैर्गुरुभिः सह ।

[(l 1) D2 [illegible] D2 4 5 [illegible] मया तत्र (for कृतं मया) —(l 2) D2 om (hapl) from धर्मज्ञै up to विमृश्यैव in the prior half of l 2 of 1289* B4 धर्मज्ञो (sic) D1 [illegible] (for [illegible])]

16 [b]) D[illegible] Dt1 G1 न, K (ed) च (for न) [illegible] Cg [illegible] ॥ [illegible] —[d]) [illegible], G2 सह [illegible] (for सहसा) —For 16, Ś1 Ñ2 V1 B D1–7 M4 subst

12[illegible]* [illegible] पापो यन्मया सह मन्त्रिभिः ।
[illegible] विमृश्यैव सहसा साहसं कृतम् ।

[illegible] up to the prior half of l 2 (cf [illegible] 12[illegible]) [illegible] l 1 —(l 1) V1 B2 [illegible], D1 [illegible], [illegible] (for [illegible]) V1 पापे (for पापो). [illegible], D[illegible] (for सह मन्त्रिभिः) —(l 2) D[illegible] (for [illegible]) B4 कृतं (sic)]

17 [a]) G1 भवितव्य मया —[b]) Dm1 च, T2 G1 हि (for वा) —For 17, Ś1 Ñ2 V1 B D1–7 M4 subst

1290* भवितव्यं तथा तेन रामेणामिततेजसा ।
मया तु तावदयशः प्राप्तं तद्विप्रवासनात् ।

[(l 1) B3 तदा (for तथा) D3 ते च (for तेन) —(l 2) Ś1 Ñ2 B1–3 D6 अशिवं (for अयशः) B4 मया तावदयशः (subm) (for the prior half) D2 प्राप्ते (sic) (for प्राप्तं) D4 5 7 ममापि चेदमयशः (D7 °यशनं [sic]) प्राप्तव्यं तद्विवासनात्]

18 [a]) Dg1 मे (for ते) —[b]) K (ed) तु (for [अ]पि) —[c]) T2 त्व प्रापयामाशु (sic), G1 त्वं प्रापयाशु, G3 सम्प्रापयाशु (for त्वं प्रा°) M1 (after corr *sec m* as in text) मा (for मां) —[d]) M1 मा (for माम्) —For 18, Ś1 Ñ2 V1 B D1–7 M4 subst and read after 1294*

1291* सुमन्त्र यदि ते किंचिन्मया पूर्वं प्रियं कृतम् ।
ततः प्रापय मां रामं प्राणा हि त्वरयन्ति माम् ।

[(l 1) D5 सुसूत (for सुमन्त्र) D4 पूर्व- (for पूर्वं) Ś1 B4 D4 6 7 कृतं प्रियं (by transp), D3 हि य(यत् ?) कृतं (for प्रियं कृतम्) M4 पुरा हार्दं मया कृतं (for the post half). —(l 2) Ś1 D6 तदा (for ततः) D5 मे (for the first मां) B1 मे (for the second माम्)]

—Thereafter cont

1292* रामप्रवाससलिले बाष्पशोकोर्मिमालिनि ।
अगाधव्यसने मग्नो घोरेऽहं शोकसागरे ।
इष्टपुत्रवियोगार्तिदुःखितेन गतायुषा ।

[(l 1) D4 -वर्त्ति (for -सलिले) V1 D1–5 7 बाष्पवेगोर्मि- D4 5 7 -संकुले (for -मालिनि) —(l 2) D2 3 5 M4 अगाधे V1 D1–5 7 M4 transp मग्नो and घोरे D2 [ऽ]यं लोक (for ऽहं शोक-) —(l 3) D5 दृष्ट- (for इष्ट-) D4 7 -[आ]र्तो (for -[आ]र्ति-)]

19 [a]) G1 यद्यापि, G2 M1 Ck यदि वाच, M2 यद्यप्यन्या, Cg as in text (for यद्यद्यापि) —[b]) Dm1 निवर्तयत, Cm °तु (as in text) [illegible] Cg राघवं निवर्तय । तुशब्दोऽवधारणे । [illegible] —For 19[ab], Ś1 Ñ2 V1 B D1–7 M4 subst

1293* इदानीमपि सूताशु गत्वा रामं निवर्तय ।

[Ś1 D6 गत्वा त्वं, D1 4 5 7 गत्वा त्वं (for सूताशु) V1 D2.3

अथवापि महाबाहुर्गतो दूरं भविष्यति ।
मामेव रथमारोप्य शीघ्रं रामाय दर्शय ॥ २०
वृत्तदंष्ट्रो महेष्वासः क्वासौ लक्ष्मणपूर्वजः ।
यदि जीवामि साध्वेनं पश्येयं सह सीतया ॥ २१
लोहिताक्षं महाबाहुमामुक्तमणिकुण्डलम् ।
रामं यदि न पश्यामि गमिष्यामि यमक्षयम् ॥ २२
अतो नु किं दुःखतरं योऽहमिक्ष्वाकुनन्दनम् ।
इमामवस्थामापन्नो नेह पश्यामि राघवम् ॥ २३
हा राम रामानुज हा हा वैदेहि तपस्विनि ।
न मां जानीत दुःखेन म्रियमाणमनाथवत् ।
दुस्तरो जीवता देवि मयायं शोकसागरः ॥ २४

गच्छाथापि च तावत्त्व (for the prior half) V1 D1–5 7 क्षिप्र (for गत्वा) D2 विवर्तय]

—c) Ś1 D1 4–7 T1 2 न हि(Ś1 D6 नाह) शक्तो(D6 T1.2 शक्ये), G1 न शक्तोस्मि (for न शक्ष्यामि) D1 मया (sic) (for विना) Ñ2 B1 3 न हि शक्यमृते तस्माज्, V1 D3 न हि शक्ष्याम्यृते राम, B2 न हि शक्ष्याम्यृते तस्माज्, D2 न हि शक्यमृते राम —d) Ś1 Ñ2 B D4–7 जीवितु(B4 °त) दें(B3 नै)वमोहित

20 ab) D4 6(after corr as in text) 7 ते गते जाते (D5 °गतयाते) (sic), G2 हि महा° (for [अ]पि महाबाहुर्) Dg1 गतो दूरो, D4 6(after corr as in text) 7 चिर पथि (for गतो दूर) Ś1 Ñ2 V1 B D1–3 6 M4 गतागतेन वा कालो (D1 marg) दीर्घ(D1 कालो) एव(Ś1 B2 D6 °व) भविष्यति —c) B3 एव (for एव) —d) V1 D1–3 क्षिप्र (for शीघ्र) Ś1 Ñ2 B D4–7 क्षिप्र राम प्रदर्शय

21 a) G3 वृत्तकर्णौ, Cr m g °दंष्ट्रो (as in text) T1 2 G M1 महाबाहु (G2 M1 °काय) (for महेष्वास) Ś1 Ñ2 V1 B D1–7 M4 सिंहस्कन्धो(Ś1 Ñ2 °न्धो) महाबाहु —b) D4 7 वशी (for क्वासौ) —c) V1 B D2 3 5 M4 जीवति, D1 जीवितु (sic) B1 साध्वैन (sic) (for साध्वेन) —d) D4 पश्यामि Dg1 Dt1 Dd1 Dm1 T1 2 G1 3 M3 transp सह and सीतया ❀ Cr g यदि पश्येय तदा जीवामीति सबन्ध । Cm construes alike Ck t यदि जीवामि इति तत्समीपगमनपर्यन्तमपि मज्जीवनस्थितौ संदेह । ❀

22 Dt1 om 22 —b) Dd1 समुक्त-, Dm1 सु°, G1 °क्ता (sic?), Cg as in text (for आमुक्त-) —c) T1 2 M2 पश्येय —For 22, Ś1 Ñ2 V1 B D1–7 M4 subst and read before 1291*

1294* पूर्णेन्दुकान्तवदन चारुपद्मदलेक्षणम् ।
यदि राम न पश्यामि यास्यामि यमसादनम् ।

[(l 1) V1 D1 M4 पूर्णकान्तेदु- (by transp) D2 पूर्णकान्तेंदुमिव (subm) (for the prior half) —(l 2) Ñ2 reads यास्यामि in marg V1 D1–3 गमिष्यामि यमक्षय (for the post half)]

23 a) G1 न, G3 हि (for नु) —b) Dg1 T1 G1 M3 सोहम् (for योऽहम्) —For 23, Ś1 Ñ2 V1 B D1–7 M4 subst and read after 24

1295* कोऽन्यस्ति दु खिततरो मया दुष्कृतकर्मणा ।
योऽहमन्तर्गतप्राणो नैव द्रक्ष्यामि राघवम् ।

[(l 1) B4 D1 कोन्योस्ति B4 दु खितस्तु-, D7 दुष्कृत° (for दु खिततरो) D1 दु खित- (for दुष्कृत-) B2 D4 5 7 -कारिणा (for -कर्मणा) —(l 2) D4 7 -प्राणैर् (for -प्राणो) Ś1 न वै, B3 D1 नैव, D5 (before corr as above) नैतद् (for नैव). B3 (*sup lin* also as above) D5 वक्ष्यामि]

24 Ś1 Ñ2 V1 B D1–7 transp 24^{abcd} and 24^{ef} —a) V1 हा सानुज (for रामा°) Dg1 reads in marg the second हा G1 हा रामानुज हा राम (by transp) —b) B3 om (hapl) हा Ñ2 वैदेहि हा (m) (by transp) Ś1 Ñ2 V1 B D1–7 पतिव्रते, Dt1 Dd1 Dm1 G1 2 तपस्विनी(G1 2 °नीं) —c) G1 M3 मा (for मां) Ś1 V1 G1 जानीथ(Ś1 °हि), G3 M4 जहि(M4 °ह्)त (sic) (for जानीत) Ś1 Ñ2 V1 B D1–7 M4 दु खार्त(M4 °र्ता [sic]) (for दु खेन) —d) M2 दीर्यमाणम् (for म्रिय°) D4 7 अपि क्षणात् (for अनाथवत्) —After 24^{cd}, B3 ins

1296* न प्राणान्धारयिष्यामि सत्यमेतन्न संशय ।

whereas Dg1 Dt1 Dd1 Dm1 T G M1–3 ins after 24^{cd}

1297* स तेन राजा दु खेन भृशमर्पितचेतन ।
अवगाढ सुदुष्पार शोकसागरमब्रवीत् ।
रामशोकमहावेग सीताविरहपारग ।
श्वसितोर्मिमहावर्तो बाष्पफेनजलाविल ।
बाहुविक्षेपमीनौघो विक्रन्दितमहास्वन ।
प्रकीर्णकेशशैवाल कैकेयीवडवामुख ।
ममाश्रुवेगप्रभव कुब्जावाक्यमहाग्रह ।
वरवेलो नृशसाया रामप्रव्राजनायत ।
यस्मिन्वत निमग्नोऽह कौसल्ये राघव विना ।

[(l 1) G3 दृढम्, M3 भयम् (for भृशम्) Dg1 G1 अर्दित-, G3 अरिथर-, Cr g t as above (for अर्पित-) —(l 2) Dd1 सुदुष्पार- —(l 3) K (ed) -[आ]भोग (for -वेग) T1 -विरहपारग —(l 4) Dt1 Dd1 Dm1 Ct -वेग- (for -फेन-) —(l 5) Dt1 Dm1 M2 3 -मीनोसो, Dd1 -मीनोसो (sic) (for -मीनौघो) —(l 6) G2 -लैवाल (sic) (for -शैवाल). Dd1 Dm1 T3 G1 2 M1 -वडवानल, Ct °मुख (as above) —(l 7) G1 [अ]श्रुपात-, Ct as above Dm1 -महाग्रहा.

अशोभनं योऽहमिहाद्य राघवं
दिदृक्षमाणो न लभे सलक्ष्मणम् ।
इतीव राजा विलपन्महायशाः
पपात तूर्णं शयने स मूर्छितः ॥ २५

इति विलपति पार्थिवे प्रनष्टे
करुणतरं द्विगुणं च रामहेतोः ।
वचनमनुनिशम्य तस्य देवी
भयमगमत्पुनरेव राममाता ॥ २६

इति श्रीरामायणे अयोध्याकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

—(1 8) Dg1 G1 [illegible] (sic) —(1 9) M3 तस्मिन् (for [illegible]) G1 2 M1-3 प्रति (for विना)]

—^{c}) Ś1 Ñ2 V1 B D1-7 M4 मयाय (for दुस्तरो) Ś1 Ñ2 V1 B3 4 D1 2 6 M4 जीव(M4 before corr °वि)ता सूत (V1 [illegible]), B1 2 D4 5 7 G1 2 जीवि(D4 °व)ता तात(B2 D[illegible] सूत, G1 2 [illegible]), D2 [illegible] (for जीवता देवि) —^{f}) Ś1 Ñ2 V1 B D1-7 M4 दुस्तर (for मयाय)

25 ^{a}) G M1 नुनोभन, Cg t अ° (as in text) M3 सोऽहम् (for योऽहम्) G2 M1 राम (for राघव) —^{b}) M3 [illegible] —^{d}) Dt1 Dd1 Dm1 T3 G3 सुमूर्छित —For 25, Ś1 Ñ2 V1 B D1-7 M4 subst

1298* [illegible] राजा [illegible] महात्मा
विन्यस्य [illegible] शोकोपहतेन चेतसा ।
[illegible]
पपात भूमौ व्यथितो नृपात्मजात ।

[(l 1) V1 D1-3 M4 [illegible] (D1 [illegible]) [illegible] (for [illegible]) —(l 2) V1 [illegible] —(l 3) D[illegible] [illegible], D6 [illegible] (for [illegible]) —(l 4) Ś1 Ñ2 L D6 पपात(B[illegible]) [illegible] (Ñ2 B1 3 °[illegible], P2 6 °[illegible])]

26 ^{a}) Ś1 Ñ2 V1 B D1-7 M4 ति(D2 3 च, D5 [s]ति)-मूढे, Dd1 Dm1 T2 3 G M1 2 प्रणष्टे —^{b}) G1 करुणतया D4 5 7 G1 च पुत्र, M3 चकार (for च राम-) Ś1 Ñ2 V1 B D1-3 6 M4 भृशकरुण पतिते (B4 lacuna, D3 ins पतितं after पतिते) पुनर्ध(B4 सुमद्र [sic])र(D1-3 °रि)ण्या. —^{c}) G1 तत्र (for तस्य) —^{d}) M3 पुरमेव तस्य (for पुनरेव राम-) D4 5 7 द्विगुणतर विललाप राममाता —For 26^{cd}, Ś1 Ñ2 V1 B D1-3 6 M4 subst

1299* भृशतरमतिशोकदु:खमग्ना
करुणतर विललाप राममाता ।

[(l 1) Ś1 D6 अभिभृशम (for भृशतरम्) B2 अपि, B4 एव, D1-3 M4 इव, D6 अथ (for अति-) Ñ2 B1 3 -दु:खशोकमग्ना(B1 °मग्ना B3 °[illegible]), V1 B4 M4 शोकदु:ख(M4 °भार)सग्ना(V1, M4 °मग्ना)]

Colophon *Sarga name* Ś1 Ñ2 V1 B D1-3 5-7 दशरथवि(B1 °प्र)लाप°, D4 रामविलाप° —*Sarga no.* (figures, words or both) B1 4 D3 om, Ś1 63, Ñ2 D4 58, V1 Dg1 Dt1 Dd1 Dm1 D7 S 59, B2 48, B3 57, D1 115, D2 5 62, D6 60 —After colophon, D6 concludes with रामाय नम, T2 with श्रीरामचन्द्राय नम, G1.3 M1 with श्रीरामाय नम, G2 with [illegible] श्रीरामाय नम.

५४

ततो भूतोपसृष्टेव वेपमाना पुनः पुनः ।
धरण्यां गतसत्त्वेव कौसल्या सूतमब्रवीत् ॥ १
नय मां यत्र काकुत्स्थः सीता यत्र च लक्ष्मणः ।
तान्विना क्षणमप्यत्र जीवितुं नोत्सहे ह्यहम् ॥ २
निवर्तय रथं शीघ्रं दण्डकानय मामपि ।
अथ तान्नानुगच्छामि गमिष्यामि यमक्षयम् ॥ ३
बाष्पवेगोपहतया स वाचा सज्जमानया ।
इदमाश्वासयन्देवीं सूतः प्राञ्जलिरब्रवीत् ॥ ४
त्यज शोकं च मोहं च संभ्रमं दुःखजं तथा ।
व्यवधूय च संतापं वने वत्स्यति राघवः ॥ ५
लक्ष्मणश्चापि रामस्य पादौ परिचरन्वने ।
आराधयति धर्मज्ञः परलोकं जितेन्द्रियः ॥ ६
विजनेऽपि वने सीता वासं प्राप्य गृहेष्विव ।
विस्रम्भं लभतेऽभीता रामे संन्यस्तमानसा ॥ ७

54

☞ Ñ1 missing for Sarga 54 (cf v l 1058*) Dm1 begins with ॐ, M2 श्रीरामाय नम For sequence in B4, see note on 2 52 5

1 ^{a}) Ś1 Ñ2 V1 B D1–7 M4 सा तु(Ñ2 B3 च, D5 तु) (for ततो) B1 भूतोपसृष्टेव, Dd1 °सृष्टेन, G2 M1 2 °विष्टेव, Cr m g t °सृष्टेव (as in text) G3 भयोपविष्टा नागीव —^{b}) Ś1 Ñ2 V1 B D1–4 6 7 M4 गतसत्त्वेव चा (V1 B3 सा)सुखा(V1 D1–3 M4 चावला, B1 च स्वय, D4 7 चासुखात्) D5 गत्वा दु ख सदासुखा —^{c}) Ś1 Ñ2 V1 B D1–3 6 M4 विललापातुरा देवी, D4 5 7 विलप्य बहुशो देवी —^{d}) Ś1 Ñ2 V1 B D2 3 6 M4 पतिता क्षितौ

2 ^{a}) M3 मा (for मां) Ś1 Ñ2 V1 B D1–7 M4 अपि तत्राशु (for यत्र काकुत्स्थ) —^{b}) G1 स (for च) Ś1 Ñ2 V1 B D1–7 M4 यत्र राम स-, Dg1 ससीतो यत्र, M3 ससीत सह- (for सीता यत्र च) —^{cd}) Dg1 Dt1 Dd1 Dm1 [अ]द्य (for [अ]त्र) G1 3 [अ]द्य क्षणमपि (for क्षणमप्यत्र) Ś1 Ñ2 V1 B D1–7 M4 सुमन्त्र न हि रामेण विना जीवि(D7 °> +°)तुमुत्सहे

3 V1 om 3^{ab} —^{a}) Ś1 Ñ2 B D1–3 6 M4 तद्योजय, Dg1 न्यवर्तय (sic), D4 5 7 T1 2 योजयस्व, Cg as in text (for निवर्तय) Ś1 Ñ2 B D6 साधु, D4 5 7 साधो, M4 ह्याशु (for शीघ्र) —^{b}) Ś1 Ñ2 B D1–7 M4 नय मामपि कानन —^{c}) Ś1 Ñ2 V1 B D1–3 5 6 M4 अथ मा, D4 7 अथ वा(for अथ तान्) Ś1 नय यस्याशु, Ñ2 B D1–7 M4 न नयस्या(D5 °स्या)शु(D4 7 °स्यद्य), V1 न नयसि त्वं, G3 न तु गच्छामि (for नानुगच्छामि) —^{d}) B4 गमि (for °ष्यामि) B2 यास्यामि यमसादन

4 ^{a}) Ś1 Ñ2 V1 B D1–3 6 M4 वाष्पोप(Ñ2 °स्रोप [sic], V1 D1 2 °ष्पाव, B4 °ष्पो °)रुद्धया वाचा, D4 5 7 ततो बाष्पोपहतया —^{b}) Ś1 D6 पुरस्तात् , Ñ2 V1 B D1–3 M4 ततस्ता(V1 D1 3 ता तत [by transp], D2 °त सा, M4 °त स-), D4 5 7 G1 वाचा स-, G3 स्व° (for स वाचा) —^{c}) Ś1 Ñ2 V1 B D1 2 4–7 M4 वाक्यम्(D1 4 5 7 °क्यैर्), D3 ° °म् (for इदम्) D6 आश्वसयन् (for आश्वा°) —^{d}) D5 तत (for सूत) —After 4, D5 ins 1 2 of 1300*

5 ^{c}) D4 5 7 M2 हि (for च) —^{d}) Dd1 G2 M1 वसति, Cg as in text (for वत्स्यति) —For 5, Ś1 Ñ2 V1 B D1–3 6 M4 subst , while D5 ins 1 2 only after 4

1300* त्यक्तुमर्हसि कल्याणि शोकं पुत्रवियोगजम् ।
तत्रापि हि सुखी रामो रस्यते देवि निर्वृत ।

[(1 1) B1 वक्तुम् (for त्यक्तुम्) D2 शो। (for शोक) —(1 2) B4 तत्रा। Ś1 स, D6 च (for हि) D2 सुख (for °खी) V1 D1–3 5 M4 वमने (for रस्यते) D3 देवी निवृने (sic)]

6 ^{a}) D3 लक्ष्मणे (sic) Ś1 Ñ2 V1 B D1–3 6 M4 ह्य (V1 D1–3 M4 [अ]प्य)स्य तेजस्वी —^{c}) M2 धर्मात्मा (for धर्मज्ञ) —For 6^{cd}, Ś1 Ñ2 V1 B D2 3 6 M4 subst

1301* वसतीत पर लोकमर्जयन्धर्मनिर्जितम् ।

[V1 वसतीति, D2 3 वसतीव M4 धर्मम् (for लोकम्) D2 3 आर्जव (for अर्जयन्) M4 आर्जयन्धर्ममास्थित (for the post half)],

whereas D1 4 5 7 subst

1302* आराधयिष्यन् धर्मेण काकुत्स्थमभिवत्स्यति ।
[D1 आराधयति]

7 ^{a}) D1 व्यजने (sic) —^{b}) D5 प्राप्ता (for प्राप्य) Dm1 गृहेष्वपि Ś1 Ñ2 V1 B D1–3 6 M4 भर्तृ(Ś1 D6 °र्तुर्)-बाहु(V1 D1–3 M4 पाद)व्यपाश्रया(V1 B1 D1–3 M4 °यात्) —^{c}) Dg1 विश्रभ, G1 विस्रब्ध (sic), Cr °स्रभण, Cm g as in text (for विस्रम्भ) T3 रमते (for लभते) Dm1 T3 G M1 सीता, M2 लीता (sic), Cr m g t as in text (for ऽभीता) ❀ Cv हितेति पाठ । अहितेति पदच्छेद । ❀ D4 5 7 विश्रभता च लभते —^{d}) Dt1 Dd1 Dm1 D4 7 G2 M1 3 विन्यस्त , D5 T1 2 G1 3 M2 सन्यस्त- (sic) (for संन्यस्त-) —For 7^{cd}, Ś1 Ñ2 V1 B D1–3 6 M4 subst

1303* देवि स्वर्गोपम वास सह रामेण वत्स्यति ।

[Ñ2 B3 देवी Ś1 D6 स्वर्गोपमे स्थाने V1 D1–3 M4 रामेण सह (by transp) विंदति (for the post half)]

नास्या दैन्यं कृतं किंचित्सुसूक्ष्ममपि लक्षये ।
उचितेव प्रवासानां वैदेही प्रतिभाति मा ॥ ८
नगरोपवनं गत्वा यथा स्म रमते पुरा ।
तथैव रमते सीता निर्जनेषु वनेष्वपि ॥ ९
बालेव रमते सीता बालचन्द्रनिभानना ।
रामा रामे ह्यदीनात्मा विजनेऽपि वने सती ॥ १०
तद्गतं हृदयं ह्यस्यास्तदधीनं च जीवितम् ।
अयोध्यापि भवेत्तस्या रामहीना तथा वनम् ॥ ११
पथि पृच्छति वैदेही ग्रामांश्च नगराणि च ।
गतिं दृष्ट्वा नदीनां च पादपान्विविधानपि ॥ १२

---

8 ^{a}) T2 [अ]सा (sic), M3 [अ]स्यां (for [अ]स्या) Dd1 D4 5 7 T2 G2 M1 दैन्य- (for दैन्य). Ś1 Ñ2 V1 B D1–3 6 M4 विषादं वा (D3 च) (for कृतं किंचित्) —^{b}) D1 सुसूक्षम् (sic), D3 मुहूर्तम् (for सुसूक्ष्मम्) D4 क्षपि- (for अपि). Ś1 Dg1 Dt1 Dd1 Dm1 D2 T1 2 लक्ष्य(D2 दृश्य)ते (for लक्षये) —^{c}) D5 उचिरे च (sic) (for °तेव) Ś1 Ñ2 V1 B D1–3 6 M4 वने(V1 D1–3 गृहे) यथोचितो वासो —^{d}) Ś1 Ñ2 V1 B D1–3 6 M4 वैदेह्या (for वैदेही) Ś1 Ñ2 V1 B Dt1 D1–7 मे, Dg1 Dd1 Dm1 मा (for मा)

9 ^{a}) Ś1 Ñ2 V1 B D1–3 6 M4 -वने रम्ये, D5 °न कृत्वा (for -वनं गत्वा) —^{b}) Ś1 Ñ2 B D6 [अ]रमत सा, M4 च र° (for स्म रमते) —^{c}) D4 5 7 [अ]व्य (for [ए]व) —^{d}) D4 5 7 वास प्राप्य गृहेष्विव (cf 7^{b}) —For 9^{cd}, Ś1 Ñ2 V1 B D1–3 6 M4 subst

1304* विजनेऽपि तथारण्ये रस्यते देवि मा शुच ।

[D1 2 व्यजनेपि (sic) D3 तथैव (for तथारण्ये) V1 रामस्ते, B3 वत्स्यते, D1–3 रमते, M4 विपिने (for रस्यते) D1 शुचा (sic)]

—After 9, D4 5 7 ins 1308*.

10 ^{a}) Ś1 Ñ2 V1 B D1–3 6 M4 वैदेही सह रामेण —^{b}) Ś1 Ñ2 V1 B D1–7 M4 पूर्ण- (D3 °र्ष), Cr as in text (for बाल-) ❀ Ct अबालचन्द्रेत्यादिच्छेदः । ❀ Cv m g alike —For 10^{c}–11^{b}, D4 5 7 subst 1306* —^{c}) G3 रामेति (for रामे हि) M2 अनीनात्मा (sic), K (ed) Cg [अ]धी° (for [अ]दीनात्मा) —^{d}) M3 विपिने (for °जने) Dg1 T1 M1 सति —For 10^{cd}, Ś1 Ñ2 V1 B D1–3 6 M4 subst

1305* अतुला विन्दति प्रीतिं न ता शोचितुमर्हसि ।

[Ś1 B2 D2 6 विदते (for विन्दति) D3 अतुला विदति प्रीति (sic) (for the prior half) Ś1 V1 D1 2 6 M4 ता न (by transp), D3 नानु- (for न ता)]

11 ^{a}) Ś1 Ñ2 B2–4 D6 M4 Cm तस्यास्, V1 जह्यास्, B1 T3 त(T3 ह्य)स्मात्, Dg1 Dt1 Dd1 D2 G3 M2 यस्यास्, Cr as in text (for ह्यस्यास्) —^{b}) D2 त्वदधिन (sic). D1 2 हि, T3 om (subm) (for च).—For 10^{c}–11^{b}, D4 5 7 subst

1306* रामचन्द्रेण युक्ता सा प्रभा चान्द्रमसी यथा ।
नित्य रामसमीपेऽस्या स्थितिमेवोपलक्षये ।
निविष्टाशरणेऽरण्ये तेनास्या विपुला रति ।
यथा पुर तथा तस्यास्तद्वनं भर्तृसंनिधौ ।

[(l 1) D5 रामा? प्रदीना D5 चन्द्रमो (for चान्द्रमसी) —(l 3) D7 -[अ]शरणो D4 7 [अ]स्य (for [अ]स्या) D4 निपुलायति —(l. 4) D4 यथा प्रभा चांद्रमसी यथा नित्यग पुर तथा तस्यान् (sic) (for the prior half)]

—^{c}) Dt1 Dd1 Dm1 हि, D4 [अ]त्रि-, Ck as in text (for [अ]पि) B4 G2 तस्य (sic) (for °स्या) Dg1 वने तस्माद्; Dt1 Dd1 Dm1 T3 M2 3 °त्तस्या, D3 4 7 पुरी रम्या, D5 पुरी तस्या (for भवेत्तस्या) —^{d}) G3 यथा (for तथा) Ś1 Ñ2 V1 B D1–7 M4 रामेण र(Ñ2 B3 D2 M4 स)हिताटवी.

12 ^{a}) Dg1 Dt1 Dd1 Dm1 D2 4 5 7 T G1 M2 Cm परि-, Cg as in text (for पथि) V1 गच्छति, G2 पृच्छसि (sic) (for पृच्छति) —^{b}) D1 ग्रामाणि (for ग्रामांश्च) —^{cd}) Ś1 Ñ2 V1 B D1–7 M4 राम कमलपत्राक्ष(D1–3 M4 °क्षी) सरांसि सरितस्तथा —After 12, Ś1 Ñ2 V1 B D1–3 5 6 M4 ins

1307* रामलक्ष्मणयोर्मध्ये सीता राजति ते शुभा ।
त्रिसुगायत्वयोर्मध्ये पद्मा श्रीरिव रूपिणी ।

[(l 1) B3 °व (for ते) —D5 om (hapl) from the post half of l 1 up to the prior half of l 2 —D1 om (hapl ?) l 2 —(l 2) V1 D2 3 M4 राम (V1 शक्र)केशवयोर् Ś1 D3 6 यथा श्रीर्, D2 पद्माश्रिर् (sic) (for पद्मा श्रीर्) M4 सुंदरी (for रूपिणी).],

while Dg1 Dt1 Dd1 Dm1 T G M1–3 ins after 12, and D4 5 7 ins after 9

1308* राम वा लक्ष्मण वापि दृष्ट्वा जानाति जानकी ।
अयोध्या क्रोशमात्रे तु विहारमिव संश्रिता ।

[(l 1) Dm1 दृष्ट्वा, T2 स्पृ° (for दृष्ट्वा) G2 M1 मैथिली (for जानकी) D4 5 7 पश्यती जनकात्मजा (for the post. half) —(l 2) G3 हि (for तु). B (ed) साश्रिता (for सं°). D4 5 7 मन्यते भृशमत्युग्रमयोध्योपवन वन],

Dg1 Dt1 Dd1 Dm1 T G M1–3 cont, D4 7 ins after 12, D5 cont after 1307*

1309* इदमेव स्मराम्यस्या सहसैवोपजल्पितम् ।
कैकेयीसंश्रितं वाक्य नेदानीं प्रतिभाति मा ।

अध्वना वातवेगेन संभ्रमेणातपेन च ।
न हि गच्छति वैदेह्याश्चन्द्रांशुसदृशी प्रभा ॥ १३
सदृशं शतपत्रस्य पूर्णचन्द्रोपमप्रभम् ।
वदनं तद्वदान्याया वैदेह्या न विकम्पते ॥ १४

अलक्तरसरक्ताभावलक्तरसवर्जितौ ।
अद्यापि चरणौ तस्याः पद्मकोशसमप्रभौ ॥ १५
नूपुरोद्घुष्टहेलेव खेलं गच्छति भामिनी ।
इदानीमपि वैदेही तद्रागान्यस्तभूषणा ॥ १६

ध्वसयित्वा तु तद्वाक्य प्रमादात्पर्युपस्थितम् ।
ह्लादन वचन सूतो देव्या मधुरमब्रवीत् ।

[(l 1) D4 5 7 त्वेकं, M3 एव (for एव) T2 सरामस्या (sic) G3 सहसेव D4 5 7 प्रभाषित, T2 [उ]प च द्विट (sic), M3 Cr [उ]पकल्पित, Cg k t as above —(l 2) Dm1 कैकेय्या D4 -ससृत, G3 °श्रुत (for -सश्रित) Dt1 Dd1 Dm1 Ct जल्प, Cm as above (for वाक्य) Dg1 Dt1 Dd1 Dm1 Ct मा, D4 5 7 मे, Cm g as above (for मा) —(l 3) D4 7 निंदयित्वा D5 परिभाषित (for पर्युपस्थितम्) —(l 4) Dd1 Dm1 D4 5 ह्लादय(Dd1 [m] य)न्, D7 हरदयन् (sic), Cm as above (for ह्लादन) D4 5 7 हृदय (for वचन) G1 मधुर and वचनम् (for वचन and मधुरम् respv) D4 5 7 देवीं वचनमब्रवीत् (for the post half)]

13 a) Ś1 D5 6 अध्वनि, Ñ2 B न चाध्व-, V1 D1 2 M4 अध्वान, D4 7 अध्वन Ś1 Ñ2 V1 B D1–7 M4 श्रमसताप- (D5 7 °पो) (for वातवेगेन) —b) Ś1 Ñ2 V1 B D1–7 M4 दु खैरपि(V1 D1–3 5 °ति, M4 °स्य [sic]) (for सभ्रमेण) Ñ2 B2–4 G1 3 वा, B1 वै (for च) —L(ed) repeats 13ab —c) Ś1 D1 3–7 न विमुचति(D3 °चित [sic]), Ñ2 B2–4 विगच्छति हि(B2 च), B1 म्लानि गच्छति हि (hypm), Dg1 Dt1 Dd1 Dm1 T M2 Cg न त्रि°, D2 नावि°, M3 न च ग°, M4 (after corr *sec m* as in Dg1) नाव° (for न हि गच्छति) Ś1 D1 4–7 वैदेही(D7 °ही) (for वैदेह्याश्) —d) Dg1 ह्य in चन्द्राशु- *sup lin* Ś1 D1 4–6 T2 -सदृशीं(D1 12 °श- [sic]) (for °शी) Ś1 D1 4–6 प्रभा Ñ2 V1 B D2 3 M4 सद्भाव(V1 सुगात्र, B1 2 4 स्वभाव, D2 3 M4 स्वगात्र)प्रभव वपु (M4 °वा प्रभा)

14 a) V1 तव पुत्रस्य, D2 आर्त° (sic) (for शतपत्रस्य) —b) Ś1 Ñ2 V1 B D1–7 T1 2 M2 4 -चन्द्रसम(M2 °निभ)- द्युति(B1 D2 7 °ति, B4 D1 3 M4 [before corr] °ति, T1 2 M2 प्रभ) —c) Ś1 वन च, M4 (after corr *inf lin sec m* as in text) वचन (for वदन) Ś1 Ñ2 B D6 7 कृत्स्न (Ñ2 B3 [m also as in B1] कात, B1 2 4 D7 कृत्स्न)मार्ता (B4 °त्रा [sic])या, V1 क्षुत्क्षमायार्ताया (sic), D1 क्षुत्तृ- पार्ताया, D2–5 क्षु(D3 त)त्श्रमार्ताया, M4 कृच्छ्रमासाया (for तद्वदान्याया) —d) Ś1 D6 सीतायाः (for वैदेह्या) Ś1 Ñ2 B1–3 D3–7 न विलुप्यते, V1 D1 2 M4 परिकल्प(V1 °ल्प्य)ते, B4 न विलक्ष्ये (for न विकम्पते) —After 14, D3–5 7 ins

1310* चन्द्रकान्ततर तस्या वदन सप्रकाशते ।
साक्षाद्भगवतो विष्णोर्वक्षस श्रीरिवागता ।
हिमालयसुता चापि उमा वाप्यागता भृशम् ।
रतिर्वा मदनस्यापि यादृशी रूपसपदा ।

[(l 2) D4 7 वक्षो (for विष्णोर्), D5 श्री प्रकाशते (for श्रीरिवागता) D4 7 विष्णो श्रीरिव सगता (for the post half) —(l 3) Note hiatus between two halves D5 [अ]- प्यगता (sic), D7 [अ]थागता (for [अ]प्या°) —(l 4) D4 7 ज्यायसी (for यादृशी)]

15 b) T1 2 अलक्तकवि- (for °रस-) —d) T1 -कोश- प्रभौ —For 15, Ś1 Ñ2 V1 B D1–7 M4 subst

1311* प्रकृत्यालक्तकरसप्रख्यौ तद्रसवर्जितौ ।
तथैव रेजतुस्तस्याश्चरणौ पद्मवर्चसौ ।

[B2 om l 1 —(l 1) B4 प्रकृत्यो (sic) Ś1 D6 [अ]लक्तकप्रख्यौ, Ñ2 [अ]नक्तक° (sic), D2 [अ]भक्तक°, D3 4 7 °निभौ, D5 रक्ततिल्कौ (for [अ]लक्तकरस-) B4 तत्र स (sic) (for तद्रस) Ś1 D4–7 लाक्षारसस(D4 om [hapl ?] स)मप्रभौ, D3 लाक्षारसविवर्जितौ (for the post half) M4 पतितालक्तकतलप्रख्यातो रसवर्जितौ —(l 2) Ś1 marg पद्म, V1 D1–3 M4 पद्मसनिभौ, B4 रथवर्चस (sic) (for पद्मवर्चसौ)]

16 Ś1 D4–7 transp 16ab and 16cd (including the star passages) —a) Dt1 Dd1 Dm1 T1 M3 Cv g k t -[उ]त्कृष्ट-, Cr m as in text (for -[उ]द्घुष्ट-) Dt1 Ct -लीलेव, Dd1 -हेसे(पे)व, Dm1 -हेला सा, Cm -खेलेव (for -हेलेव) Ś1 D4–7 नूपुरायु(Ś1 °मु, D5 6 °स)क्तचरणा, Ñ2 V1 B D1–3 M4 नूपुरासिजि(V1 B3 M4 °शिजि, B1 4 °ज)च(D2 °भ)रणा —b) D1 स्खलद्, D2 सूवल (sic), D4 खेलन्, T2 शेल (sic) (for खेल) D6 गच्छतु (for °ति) Ś1 D4–7 जानकी, Ñ2 V1 B D1–3 मैथिली (for भामिनी) —After 16ab, Ś1 D4–7 ins

1312* गुप्ता पुरुषसिंहेन सिंहेनेव गिरेर्गुहा ।
दुष्प्रधर्षा दुष्प्रधर्षं सर्वेषा वनचारिणाम् ।

[(l 2) D4 5 7 दुर्द्धर्षा दु प्रधर्षा(D7 °दर्शा) च (for the prior half)]

—V1 D2 3 om (hapl) from 16c up to l 1 of 1314* —cd) —D1 reads in marg from 16d up to the prior half of l 2 of 1314* Ś1 D4–7 तत्र सन्यस्तभूषणा, K(ed) तद्रागाद्व्यस्तभूषणा (for d) Ñ2 B D1 M4 भर्तारमनुगच्छन्ती विष्णु श्रीरिव रूपिणी ❀ Ck भर्तृप्रीतियोजकभूषणानुरागात् अन्यस्तानि अत्यक्तानि भूषणानि यया सा । ❀ —After 16, Ś1 D4–7 ins

1313* सुरूपा शोभयाहीना शोभतेऽभ्यधिक वने ।
इदानीमपि वैदेही वालैरनुगता मृगै ।

[D6 reads *sec m* in marg from l 1 up to the prior half of l 2 —(l 1) D6 स्वरूप- Ś1 [अ]पि, D4

गजं वा वीक्ष्य सिंहं वा व्याघ्रं वा वनमाश्रिता ।
नाहारयति संत्रासं बाहू रामस्य संश्रिता ॥ १७
न शोच्यास्ते न चात्मा ते शोच्यो नापि जनाधिपः ।
इदं हि चरितं लोके प्रतिष्ठास्यति शाश्वतम् ॥ १८
विधूय शोकं परिहृष्टमानसा
महर्षियाते पथि सुव्यवस्थिताः ।
वने रता वन्यफलाशनाः पितुः
शुभां प्रतिज्ञां परिपालयन्ति ते ॥ १९
तथापि सूतेन सुयुक्तवादिना
निवार्यमाणा सुतशोककर्शिता ।
न चैव देवी विरराम कूजिता-
त्प्रियेति पुत्रेति च राघवेति च ॥ २०

इति श्रीरामायणे अयोध्याकाण्डे चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

[अ]ति- (for [अ]भि-) —(l 2) Cf 16[c] for the prior half]

17 [a]) G1 सा (for first वा) —[b]) T1 damaged for वा G1 3 जनकात्मजा, G2 M1 वनमागता, Cg as in text (for °माश्रिता) —For 17, Ś1 Ñ2 V1 B D1–7 M4 subst

1314* सिंह वने गज प्रेक्ष्य व्याघ्र चापि च मैथिली ।
सा नैवोद्विजते यान्ती भर्तुर्वीर्यबलाश्रया ।

[V1 D2 3 om l 1, D1 reads up to the prior half of l 2 in marg (for both cf v l 16) —(l 1) B4 D4 5 7 वन-, D1 मत्त (for वने) Ś1 D1 4–7 M4 वापि (for प्रेक्ष्य) Ś1 D1 4–7 M4 वा प्रेक्ष्य, B1 °तु (for चापि च) Ś1 D4–7 जानकी —(l 2) B4 [उ]द्वि ते याति (sic) Ś1 V1 D1 4–7 M4 न त्रासमे(D6 °मि)ति(V1 D1 M4 नवोद्विजति) गच्छती, D2 3 भर्तारमनुगच्छती (for the prior half) V1 B2 D1–5 7 M4 भर्तृ (for भर्तुर्) V1 D1–5 7 M4 -व्यपाश्रयात् (D3 4 7 °या), B1 -बलाश्रयात् Ś1 D6 वने भर्तृव्यपाश्रया (for the post half)]

—Thereafter all the above MSS cont

1315* तथैव राम पुत्रस्ते लक्ष्मणश्चैव वीर्यवान् ।
उदारवपुषौ वीरौ न ग्लानिमधिगच्छत ।
परस्परप्रियहित कुर्वाणौ प्रियवादिनौ ।
न पितुर्नैव मातुश्च नान्यस्य स्मरतो वने ।

[(l 1) B1 अथैव, D2 तानेव (for तथैव) M4 (after corr *inf lin sec m* as above) लक्ष्मण V1 D3 5 M4 (after corr *inf lin sec m*) चापि (for चैव) —(l 2) Ñ2 V1 B D1 2 M4 तथवोदारव(B2 °., B4 °)पुषौ, D3 तथा ता चारुभोपुष्पो (sic) (for the prior half) Ñ2 V1 B2 3 D2–5 7 M4 ग्लानिम् (for ग्ला°) D1–3 5 उपगच्छत, D4 7 उपगच्छता (for अधि°) —(l 3) Ñ2 B2 3 परस्पर (for °स्पर-) D4 7 -हितौ. V1 D1–3 M4 कुर्वतौ (for कुर्वाणौ) M4 हितवादिनौ —(l 4) B4 वन- (sic), D6 नापि (for नैव) V1 D1–3 चान्यस्य (for मातुश्च) D4 5 7 पितुर्मातुश्च नान्यच्च(D5 °न्याश्च, D7 °स्य), M4 न पितुर्न मातुनान्यस्य (hypm) (for the prior half) V1 D1–5 7 M4 कस्यचित् (for नान्यस्य)],
while G1 3 M1–3 ins after 17

1316* करम्भमितमध्याङ्गी पीनोन्नतपयोधरा ।
राजहंसीव रामस्य पादमालोक्य गच्छति ।

[(l 2) M1–3 पृष्ठम् (for पादम्) G3 पादावुद्वीक्ष्य G1 M1 गच्छती]

18 [ab]) D4 5 7 न ते शोच्या (by transp) K(ed) Cm g [आ]त्मान (for [आ]त्मा ते) D4 5 7 शोचनीयो, M3 °च्यो नाति- (for शोच्यो नापि) Ś1 Ñ2 V1 B D1–3 6 M4 न ते शोच्यास्त्वया देवि परस्परहिते रता —[c]) M4 च (for हि) T1 damaged for त in चरित Ś1 Ñ2 V1 B D1–7 M4 तेषा, T1 damaged (for लोके) —[d]) Ś1 Ñ2 B D6 ख्यातिं लोकेषु यास्यति(B3 [*sup lin* also] °के चरिष्यति, D6 गच्छति), V1 D1–5 7 M4 ख्याति(D2 °त) लोके(D4 5 7 लोके ख्याति [by transp]) गमिष्यति —After 18, Ś1 D5 6 ins

1317* अवश्यमेतत्कार्यं हि सुखोदर्कं भविष्यति ।

19 [a]) Ś1 Ñ2 V1 B D1–7 G3 M4 विहाय B4 शो , D3 शोच्यक (sic) (for शोक) Ś1 Ñ2 B D6 परिगृह्य, V1 D1–3 M4 °तुष्ट-, D4 5 7 °पूर्ण- (for °हृष्ट-) Ś1 Ñ2 B D6 मानस, V1 D1–5 7 -मानसो (for -मानसा) —[b]) Ś1 Ñ2 B D6 -कल्पस्, D4 5 7 -जुष्टे (for -याते) V1 D1 3–5 7 सुव्यवस्थित Ś1 Ñ2 B D6 तपसि व्यवस्थित , D2 सुपथि व्यवस्थिता , M1 पथि सव्यवस्थिता , M4 °चेपि च स्थिता —[c]) Ś1 Ñ2 V1 B D1–7 रतो, M3 रत (sic), M4 -चरा (for रता) Ś1 D4–7 मूल-, Ñ2 B मेध्य-, V1 रम्य-, Dg1 कन्द- (for वन्य-) Ś1 Ñ2 V1 B D1–7 -फलाशन , Dg1 °शिन (for °शना) Ś1 Ñ2 V1 B D1–3 5 6 M4 स(M4 च) ते, D4 7 सुतो, T3 प्रभुश्च (sic) (for पितु) —[d]) Dt1 Dd1 Dm1 G2 प्रति- (for परि-) Ś1 Ñ2 V1 B D1–7 सुतो(D4 7 रामो) महात्मा कुरुते (V1 D1–5 7 चरते) महत्(D4 7 पर)तप , M4 सुख चरते हि वने महत्तप

20 [a]) Dm1 हि, M4 [ए]व (for [अ]पि) T3 नियुक्त-, M4 हितार्थ- (for सु°) Ś1 Ñ2 V1 B D1–7 तथा सु(D1 स्तु [sic])मन्त्रेण हितार्थवादिना —[b]) Ś1 Ñ2 V1 B D1–7 M4 [अ]पि(Ñ2 सु, B4 om [subm]) सती सुतप्रिया —[d]) Dm1 पुत्रे G1 om first च (subm) —For 20[cd], Ś1 Ñ2 V1 B D1–7 M4 subst

५५

वनं गते धर्मपरे रामे रमयतां वरे ।
कौसल्या रुदती स्वार्ता भर्तारमिदमब्रवीत् ॥ १
यद्यपि त्रिषु लोकेषु प्रथितं ते महद्यशः ।
सानुक्रोशो वदान्यश्च प्रियवादी च राघवः ॥ २
कथं नरवरश्रेष्ठ पुत्रौ तौ सह सीतया ।
दुःखितौ सुखसंवृद्धौ वने दुःखं सहिष्यतः ॥ ३

1318* न विप्रलापाद्विरराम दु खिता
नरेन्द्रपत्नी प्रियपुत्रलालसा ।

[(l 1) B4 विपुलाद्वा (corrupt), D1 विप्र॰पाद, D4 7 चाभिलापा(D7 °पा)द्, D5 हि प्रला° (for विप्रलापाद्) —(l 2) D4 5 7 कर्शि(D5 °र्षि)ता, M4 -वत्सला (for -लालसा)]

Colophon —*Sarga name* Ś1 B4 D4–7 कौसल्याश्वासन (D4 5 7 °न), Ñ2 B1 3 कौसल्यासमाश्वास (B1 °सन), V1 D1–3 कौशल्याविलाप , B2 कौसल्याश्वास —*Sarga no* (figures, words or both) B1 2 4 D3 om , Ś1 64, Ñ2 D4 59, V1 Dg1 Dt1 Dd1 Dm1 D7 S 60, B3 58, D1 116, D2 5 63, D6 61 —After colophon, D6 concludes with रामाय नम , T2 श्रीरामचन्द्राय नम , G श्रीरामाय नम .

55

☞ Ñ1 missing for Sarga 55 (cf v l 1058*). —Dm1 begins with ॐ, D6 रामाय नम , M1 2 श्रीरामाय नम

1 [a]) Dg1 Dt1 Dd1 Dm1 धर्मरते (for °परे) —For 1[ab], D4 5 7 subst , while D3 ins before 1320*

1319* विसर्जिते तथा सूते सुमन्त्रे पार्थिवालयात् ।

—[c]) Ct*p* रुदतीव Dt1 D7 चार्ता, D1 चात्र, D5 त्वार्ता, Ck t आर्ता, Ct*p* as in text (for स्वार्ता) —[d]) D4 5 7 राजानम् (for भर्तारम्) —For 1, Ś1 Ñ2 V1 B D1–3 6 M4 subst

1320* प्रत्याश्वस्त तु राजानमुत्थाप्य भृशदु खितम् ।
कौसल्याश्वासयामास शयने शोकलालसम् ।
तत एन प्रमार्जन्ती वीजयन्ती च मूर्छितम् ।
भूय प्रत्यागतप्राणमिद वचनमब्रवीत् ।

[(l 1) V1 D1 प्रत्याश्वस्य, B1 °श्वस्ता, D2 3 °श्वास्य (for प्रत्याश्वस्त) D1 [अ]थ (for तु) L(ed) उत्थाय (for उत्थाप्य) —(l 2) V1 स्थापयामास, D1–3 M4 शाययामास (for [आ]श्वासयामास) Ś1 शोकविह्वल, V1 D1 शोकलालसा, B3 (m also as above) शोकमानस, B4 लोकलालस, D6 शोकविक्लव (for शोकलालसम्) —(l 3) B4 (with hiatus) तत्र एन (for तत एन) V1 D1–3 M4 सवा(D1 M4 °व)हती (for वीजयन्ती) M4 सुदु खित Ś1 D6 अश्रूणि मार्जयती च विलपती च दु खिता]

2 [a]) Ś1 Ñ2 V1 B D1–7 M4 यदिद (for यद्यपि) —[b]) Dd1 व्यथित (for प्र°) D5 सुमहद् (for ते महद्) —[d]) G3 damaged for यवादी च रा G2 M1 [इ]ति (for च) —For 2[cd], Ś1 Ñ2 V1 B D1–7 M4 subst

1321* पुत्रप्रव्राजनात्तत्ते प्रनष्टमिति लक्षये ।

[B2 प्रगल्भम्, D4 5 7 विनष्टम् (for प्रनष्टम्) Ś1 B1 D6 इव (for इति) V1 D1 3–5 7 मे मति, D2 मे वच (for लक्षये)]

—Thereafter Ś1 Ñ2 V1 B D1–7 M4 ins a long passage relegated to App I (no 18) and then Ś1 Ñ2 B D4–7 ins

1322* तथा तु बहु कौसल्या विलप्य क्रोधमूर्छिता ।
अनिवार्यैव रोष सा पुनरेवाभ्यभाषत ।

[(l. 1) B1 D4 7 च (for तु) Ś1 बहुमूर्छिता —(l 2) Ś1 D6 अनिकृष्य, Ñ2 B3 अनवाप्य, B1 अतिवार्य (for अनिवार्य) Ś1 B3 D3 4 6 7 रोपस्य, Ñ2 दोपस्य, B1 रोष वा (रोष सा) Ñ2 B3 पार पुनरभाषत (for the post half)]

3 [a]) Dd1 नरवरश्रेष्ठौ, Dm1 नरवरस्येष्टौ —[c]) G1 सुखितौ (for दु खितौ) Dg1 Dd1 Dm1 T3 G3 दु ख- (for सुख-) T1 -सरुद्धौ (for -संवृद्धौ) Dt1 G3 कथ (for वने) —For 3, Ś1 Ñ2 V1 B D1–7 M4 subst

1323* त्वया यस्त्वनियुक्तोऽपि भक्त्या राममनुव्रत ।
लक्ष्मणोऽनुगत प्रेम्णा त शोचामि विशेषत ।

[(l 1) V1 D2 त्वया य (sic), B2 यस्त्वया (by transp) D2 हि (for तु) Ñ2 [अ]युक्तोपि (subm), D3 °क्तो हि (for [अ]नियुक्तोऽपि) —(l 2) B4 lacuna for लक्ष्मणोऽनुगत] —thereafter Ś1 Ñ2 B D4–7 cont , while D1–3 M4 cont lines 10–11 only

1324* योऽभिषेके प्रतिहते मम पुत्रस्य धीमत ।
नि सृतो वनुरादाय तूर्णमश्रुतविस्तर ।
क्रोधेन महताविष्टो रामराज्यापहारिणम् ।
न स जानाति धर्मात्मा स्वगृहादग्निमुत्थितम् ।
यो गच्छति स्वय रामे क्रोधसरक्तलोचन । [5]
रोपाद्धि कृतवान्वाप्य तच्च तस्य स्माराम्यहम् ।
योनुयात स्वय त्यक्त्वा मातर भ्रातृवत्सल ।
लक्ष्मण तमह रामाच्छोचाम्यद्य विशेषत ।
राज्ञो महेन्द्रकल्पस्य जनकस्य महात्मन ।
सुता तामनवद्याङ्गीं वैदेहीं चिन्तयाम्यहम् । [10]
अत्यन्तसुखसवृद्धा लालिता पितृवेश्मनि ।
अत्यन्तसुकुमाराङ्गी श्यामा पद्मदलेक्षणा ।
या सुखानि परित्यज्य सर्वांश्च ज्ञातिबान्धवान् ।
पति ह्यनुसृता यान्त त्विमवस्थाद्य सा सती ।

[(l 1) B3 सो (for यो) B3 भ्रातृ रामस्य (for मम पुत्रस्य) D5 सुव्रत (for धीमत) —(l 2) B4 निसृतो, D7 नि भृतो (for

सा नूनं तरुणी श्यामा सुकुमारी सुखोचिता ।
कथमुष्णं च शीतं च मैथिली प्रसहिष्यते ॥ ४
भुक्त्वाशनं विशालाक्षी सूपदंशान्वितं शुभम् ।
वन्यं नैवारमाहारं कथं सीतोपभोक्ष्यते ॥ ५
गीतवादित्रनिर्घोषं श्रुत्वा शुभमनिन्दिता ।
कथं क्रव्यादसिंहानां शब्दं श्रोष्यत्यशोभनम् ॥ ६

नि सुनो) B1 नूनम् (for तूर्णम्) —(l 3) Ś1 D6 -[अ] पहारण, Ñ2 B3 -[अ]भिहारिण, B4 damaged (for -[अ]प-हारिणम्) —After l 4, Ś1 D5–7 ins

1324(A)* गृहीतचीर यो दृष्ट्वा राघव प्रियराघव ।
पूर्वमेव सचीरोऽभूत्तस्य शोचामि धीमत ।
क्रियमाण नरेन्द्रेण मम निर्विषय सुनम् ।

[(l 1) Ś1 -चीरो य (meta) —(l 2) D5 पूर्णम् D5 त शोचामि विशेषत (for the post half)]

—Thereafter D5 reads l 7 (var) repeating it in its proper place —Ś1 D4 6 7 om (hapl ?) l 5–6 —(l 5) D5 वन (for स्वय) —(l 6) B1 च (for हि) Ñ2 B3 रोषाद्धि (B3 °द्वि) श्रुनवाप्य च (for the prior half) B3 तम्य (for तच्च). B4 सम्यक् (for तस्य) —D5 reads (first time) l 7 after 1324(A)* —(l 7) Ś1 D6 भक्त्या, D4 5 (both times) 7 बुद्ध्या (for त्यक्त्वा) Ś1 D4–7 (D5 second time) भ्रातर (for मातर) D5 (first time) लक्ष्मण त साराम्यह (for the post half) —(l 8) D4 शोचाम्यस्य —(l 10) D1 3 M4 शोचे दुहितर चापि जनकस्य महीपते —D4 7 transp l 11 and 12 —(l 11) B4 D4 सवद्धा, D1–3 सवृद्धा (for -सवृद्धा) Ś1 D4–7 लाडिता, D1–3 लालिता (for -लालिता) M4 चापि (for पितृ) —(l 12) Ñ2 B2 3 अत्यत, B4 अत्यर्थ- —(l 14) Ś1 D6 या, B1 om , B4 D5 च (for हि) B4 याति (sic) (for यान्त) D4 7 पति व्य(D7 ह्य)नुश्रिता यात (for the prior half) B1 3 कामवस्थामुपैष्यति, B4 किमवस्थास्य शाश्वती (for the post half)]

4 V1 om 4–7^b —^{a}) Ś1 Ñ2 B D4–7 कथ सा(Ñ2 B1 3 हि, G [ed] नु) सुतनुस्तन्वी(Ś1 D6 °नु साध्वी) —^{cd}) Dg1 G1 2 M1 विषहिष्यति, Dt1 Dd1 Dm1 T3 G3 M2 3 विस (T3 G3 M2 3 °ष)हिष्यते(Dm1 °ति) Ś1 Ñ2 B D4–7 शीतमुष्ण च वर्षं च(Ñ2 B1 3 सा) वैदेही प्र(Ñ2 B2 3 स, B4 वि)सहिष्यति(Ñ2 B3 °ते) —For 4, D1–3 M4 subst

1325* अत्यन्तसुकुमाराङ्गी श्यामा पद्मदलेक्षणा ।
वर्षोष्णहिमदु खानि शक्ष्यते मैथिली कथम् ।

[(l 1) D2 श्यामा पद्मदलेक्षणा (for the post half) —(l 2) D2 वर्षोष्णे M4 -शीत- (for -हिम-)]

—After 4, Ś1 Ñ2 B D4 6 7 ins

1326* या श्राम्यति गृहेऽप्यस्मिंश्चरन्ती वसुधातले ।
कथ सा विजनेऽरण्ये वैदेही विचरिष्यति ।

[(l 1) D4 यस्मिश्, D7 ह्यस्मिश् (for ऽप्यस्मिंश्) —(l 2) B2 सा कथ (by transp) B4 रम्ये (for ऽरण्ये) L(ed) प्रचलिष्यति],

—B3 cont

1327* कोमलाभ्या च पादाभ्या कथ यास्यति काननम् ।

5 V1 om 5 (cf v l 4) —^{c}) T3 नैवाहम् (sic) (for °रम्) —^{d}) Dg1 Dm1 G2 M1 [उ]पभोक्ष्यति, G2 M1 [अ]भिभोक्ष्यति —For 5, Ś1 Ñ2 B D1–7 M4 subst

1328* भुक्त्वा स्वादूनि भोज्यानि तथान्यानि च मैथिली ।
कथ वन्यान्यभोज्यानि कटुतिक्तानि भोक्ष्यते ।

[(l 1) B1 M4 त्यक्त्वा, D4 मुक्त्वा (for भुक्त्वा) B4 स्वादुसु , D1 मिष्टानि, D2 मृष्टानि (for स्वादूनि) B2 भोगानि (for भोज्यानि) Ñ2 B4 [अ]न्नानि (for [अ]न्यानि) Ñ2 B3 [अ]पि (for च) Ś1 D1–7 M4 ह्य(D6 चा)न्नानि(D1–3 M4 हृद्यानि) जनकात्मजा (for the post half) —M4 reads (var) twice l 2 —(l 2) D1 चान्यानि, D3 ऽन्यानि (for वन्यानि) Ñ2 B1 4 [अ]कृत्यानि, B2 3 D3 [अ]हृद्यानि, D4 5 7 M4 (both times) भोज्यानि (for [अ]भोज्यानि) D2 कथ वान्य (न्या)न्यवन्यानि (for the prior half) B4 D4 7 भोक्ष्यति M4 (first time) भोक्ष्यते जनकात्मजा (second time विजने वने) (for the post half)]

—Thereafter Ś1 Ñ2 B D4–7 cont

1329* शयनानि महार्हाणि पुरा ससेव्य जानकी ।
कथ पर्णावृता भूमिमधिवत्स्यति मे स्नुषा ।

[(l 1) Ś1 D4–7 मैथिली —(l 2) Ñ2 पत्रावृता, B पर्णवृता (for पर्णा°) B2 अधिगच्छति, D4 7 अभिवत्स्यति (for अधि°). D4 7 जानकी]

—Thereafter D4 5 7 ins 1331*

6 V1 D4 7 om 6 (for V1 cf v l 4) —^{b}) Dt1 Dd1 Dm1 शुभसमन्विता, G1 सुखमनिंदिता, M3 शुभनिनादित (for शुभ°) —For 6, Ś1 Ñ2 B D1–3 5 6 M4 subst

1330* वीणावेणुस्वनै सुप्ता लालिता या विबोध्यते ।
तन्वङ्गी सा कथ घोरैर्बहुपक्षिमृगारुतै ।

[(l 1) Ś1 D6 वेणुवीणा- (by transp) Ñ2 -स्वरै (for -स्वनै) Ñ2 B3 श्राविता (for लालिता) B4 lacuna, M4 विबु-ध्यते (for विबो°) —(l 2) D1–3 M4 सा विबोध्येत(M4 °ध्यति) तन्वगी, D5 सा बोध्यते च तन्वगी (for the prior half) D1–3 5 M4 घोरे (for बहु-) B1 (*sup lin* also) D3 -शिवारुतै , D2 °क्षतै (sic) (for -मृगारुतै)]

—Then Ś1 Ñ2 B D6 cont , while D4 5 7 cont (D4 7 owing to om.) after 1329*

महेन्द्रध्वजसंकाशः क्व नु शेते महाभुजः ।
भुजं परिघसंकाशमुपधाय महाबलः ॥ ७
पद्मवर्णं सुकेशान्तं पद्मनिःश्वासमुत्तमम् ।
कदा द्रक्ष्यामि रामस्य वदनं पुष्करेक्षणम् ॥ ८

वज्रसारमयं नूनं हृदयं मे न संशयः ।
अपश्यन्त्या न तं यद्वै फलतीदं सहस्रधा ॥ ९
यदि पञ्चदशे वर्षे राघवः पुनरेष्यति ।
जह्याद्राज्यं च कोशं च भरतेनोपभोक्ष्यते ॥ १०

1331* पुरा वस्त्राणि मुख्यानि परिधाय यशस्विनी ।
कथ सा कुशचीराणि गात्रै· सधारयिष्यति ।
सुललाट सुकेशान्त पद्मपत्राभमव्रणम् ।
सुदन्त सुहनुस्कन्ध पूर्णचन्द्रसमप्रभम् ।
धूयमान वने वातैर्निष्पीत चार्करश्मिभि ।
कथ तच्चारुवदन तस्या वैवर्ण्यमेष्यति ।

[(l 1) Ś1 मुख्यानि वस्त्राणि (by transp), D5 वस्त्राणि दि·यानि (for वस्त्राणि मुख्यानि) —(l 2) B2 वृक्ष (for कुश-) D4 7 गात्रे B2 सस्कारयिष्यति —(l 3) Ś1 D6 पद्मपत्रायतेक्षण, Ñ2 B3 पद्मपर्णा°, B1 पद्मवर्णा°, B2(m also as above) पर्णवर्णा° (for the post half) —(l 4) Ś1 सुदत (for सुदन्त) Ś1 D6 सुहनु स्वग, B1 सुहनु स्वक्ष, B3 सहनु°, B4 सुहन्वक्ष (sic) (for सुहनुस्कन्ध) D4 5 7 सुनस सुहनु (D4 हनुमत्) स्वच्छ (D5 स्वक्ष) (for the prior half) —(l 5) Ñ2 वनैर्, D7 om (for वने) Ś1 D6 7 निपीत, B3 निष्पीट, B4 निष्प्रभ, D4 नि पीत, D5 नि पीता (for निष्पीत) —(l 6) Ñ2 B3 नु (for तच्) B4 (after corr m as above) -दर्शन (for -वदन) D4 5 7 मुख तच्चारुताम्राक्ष (for the prior half) D5 वैवर्णम्]

—After 6, Dg1 ins श्रीमते रामानुजाय नम

7 V1 om 7^{ab} (cf v l. 4) —^{a}) Dt1 G1 सकाश (for सकाश) —For 7^{ab}, Ś1 Ñ2 B D1–7 M4 subst

1332* महेन्द्रध्वजसकाशो यशस्वी मनुजध्वज ।
ध्वजो नृपकुलस्यास्य किमवस्थ स सप्रति ।
नून शेते स मेदिन्या राङ्कवास्तरणोचित ।

[(l 1) D4 7 महेंद्रगज D1–3 -ध्वजवत्ख्यात, M4 -ध्वज-विख्यात (for ध्वजसकाशो) Ś1 D6 देवराजप्रतीकाशो (for the prior half) Ś1 D6 पुरुषर्षभ, D4 5 7 मनुजर्षभ (for मनुज ध्वज) D1–3 M4 कथ रघुकुलध्वज (for the post half) —D1–3 M4 om l 2 —(l 3) Ś1 D6 स्वपिति, D4 5 7 स्वप्स्यति (for शेते स) D1–3 शेतेद्य (D2 °थ) वसुधापृष्ठे, M4 अधिशेतेद्य वसुधा (for the prior half) Ś1 D4–7 महार्हशयनोचित (for the post half)]

—^{d}) D5 उपाश्राय Ś1 Ñ2 B D4–7 महाभुज, Dg1 Dd1 Dm1 G M1 सहानुज (for °बल) —For 7^{cd}, V1 D1–3 M4 subst

1333* उपधाय भुज पीन भूमावेव महाभुज ।
सीतया सह शेतेऽद्य तृणाना प्रस्तरे कृते ।

[(l 2) D1 राम म, D2 रामश्च, D3 शेतेप (sic) (for शेतेऽद्य) —D2 om from तृणाना up to 8^{a} V1 सस्तवे, D3 स्रस्तरे (for प्रस्तरे) D2 क्षते (for कृते) D1 तृणै सस्तरणक्षितौ (for the post half)]

8 D2 om 8^{a} (cf v l 1333*) —^{a}) Ñ2 V1 B D1 3 5 M4 पद्मगधि (D5 °ध-) (for °वर्ण) B4 **श्यत (for सुकेशान्त) Ś1 D4 6 7 चारुघो (D7 °को)ण विशालाक्ष —^{b}) G3 damaged from नि up to द्रक्ष्या in^{c} Dt1 Dd1 Dm1 T G1 2 M1–3 -निश्वासम् (for नि °) G1 (after corr as in text) उत्थित (for उत्तमम्) Ś1 Ñ2 V1 B D1–7 M4 पूर्णचन्द्रसमद्युति —^{c}) B2 द्रक्ष्यसि (for द्रक्ष्यामि) —^{d}) Ś1 Ñ2 V1 B D1–7 M4 मुख पद्मदलेक्षण

9 ^{ab}) Dd1 Dm1 T2 G M1 वज्रसारमिद, Cg °मय (as in text) D5 7 मन्ये (for नून) D4 5 7 सुदुर्भिद (for न सशय) Ś1 Ñ2 V1 B D1–3 6 M4 धात्रा मे हृदय नूनमश्मसारमय कृत (D2 दृढ) —^{c}) G1 तनय (for त यद्वै) Ś1 Ñ2 B हीन यद्रामचंद्रेण, V1 D1 3 त (D1 य) द्धीन यन्नृ (D3 नृप)-चंद्रेण, D2 दु·खेन शतधा तत्तु, D4 7 यद्विदीर्णं सुपुत्रेण, D5 यद्धीनाया सुपुत्रेण, G3 अथ पश्यानन यद्वै (sic), M4 यद्विना यानुचंद्रेण (sic) —^{d}) Ś1 Ñ2 V1 B D1 3 5 6 M4 न विदीर्णं, Dd1 Dm1 फलतीह, G1 फलतीय, Ct as in text (for फलतीद) —After 9, Ś1 Ñ2 B D4–7 ins

1334* एतत्ते कृपण कर्म कृत लोकविगर्हितम् ।
निरस्ता· परिधावन्ति त्रयस्ते यन्महावने ।

[(l 1) Ñ2 तु (for ते) B2 लोके (for लोक-) —(l 2) B4 निवस्त्रा (for निरस्ता) Ñ2 illeg, B पथि धावति (for परिधा°)],

while Dg1 Dt1 Dd1 Dm1 T G M1–3 ins

1335* यस्त्वया करुण कर्म व्यपोह्य मम बान्धवा ।
निरस्ता परिधावन्ति सुखार्हा कृपणा वने ।

[(l 1) Dg1 विपोह्य, G1 M3 त्वपोह्य, Cm g t as above, Ck अपोह्य (for व्य°) Dg1 Dm1 (after corr) G3 M3 बाधवान् (Dm1 before corr °वा), Cv r m g k t as above —(l 2) cf the prior half of l 2 of 1334* G3 damaged for निरस्ता G3 वन (for °ने)]

10 ^{b}) Ś1 D4–7 न राम (D4 5 7 रामो न [by transp]) (for राघव) Ñ2 V1 B1–3 D1–3 M4 पुनरेष्यति मे सुत, B4 प्रणवेश्यति (sic) वे सुत —After 10^{ab}, Ś1 D4–7 ins

1336* ततस्त्यक्ष्याम्यह प्राणान्न कार्यं जीवितेन मे ।
सर्वथा ह्यागतो राम प्रवासात्पुरुषर्षभ ।

[(l 1) D5 तदा (for ततस्) —(l 2) पुरुषर्षभ]

एवं कनीयसा भ्रात्रा भुक्तं राज्यं विशांपते ।
भ्राता ज्येष्ठो वरिष्ठश्च किमर्थं नावमंस्यते ॥ ११
न परेणाहृतं भक्ष्यं व्याघ्रः खादितुमिच्छति ।
एवमेव नरव्याघ्रः परलीढं न मंस्यते ॥ १२
हविराज्यं पुरोडाशाः कुशा यूपाश्च खादिराः ।
नैतानि यातयामानि कुर्वन्ति पुनरध्वरे ॥ १३
तथा ह्यात्तमिदं राज्यं हृतसारां सुरामिव ।
नाभिमन्तुमलं रामो नष्टसोममिवाध्वरम् ॥ १४

—^{cd}) G3 damaged for जह्याद्राज्य Dg1 Cg भरतेनोपभुज्यते, Dt1 Dd1 Dm1 T2 3 Cm gp t भरतो(T2 °ते) नोपलक्ष्य(Dm1 °क्ष)ते, T1 G3 M1 3 भरतो नोपभोक्ष्य(G3 °लभ्य)ते, K(ed) भरतो नोपभुज्यते, Cgp भरतो यदि भोक्ष्यते (for ^{d}) V1 D1–3 M4 न स राज्य प्रियेणैव(D1 °व) भरता व्यतिलप्स्य(M4 °भ्य)ते —For 10^{cd}, Ś1 Ñ2 B D4–7 subst

1337* स नैता श्रियमन्विच्छेद्दीयमानामपि स्वयम् ।

[Ś1 D4–7 न म ता, B4 शनैस्ता (for स नैता) D4 7 आकाङ्क्षे (sic), D5 आकाङ्क्षेद् (for अन्विच्छेद्)]

—Then D4 5 7 cont, while Ś1 D6 subst for 11

1338* भरतेनोपभुक्ता हि पृथिवीं विपुलश्रियम् ।
नोपभोक्ष्यति धर्मज्ञ परिभुक्तामिव स्रजम् ।

[(l 1) D7 भरतेनोमनुक्ता (sic) (for °पभुक्ता) Ś1 D6 पृथिव्या Ś1 D5 6 विपुला —(l 2) Ś1 D6 परभुक्ताम्, D4 °मुक्ताम् (for परिभुक्ताम्)]

—D4 5 7 further cont, while Dg1 Dt1 Dd1 Dm1 T G M1–3 ins after 10

1339* भोजयन्ति किल श्राद्धे केचित्स्वानेव बान्धवान् ।
तत पश्चात्समीक्षन्ते कृतकार्या द्विजर्षभान् ।
तत्र ये गुणवन्तश्च विद्वांसश्च द्विजातय ।
न पश्चात्तेऽभिमन्यन्ते सुधामपि सुरोपमा ।
ब्राह्मणेष्वपि तृप्तेषु पश्चाद्भोक्तु द्विजर्षभा । [5]
नाभ्युपेतुमलं प्राज्ञा शृङ्गच्छेदमिवर्षभा ।

[(l 1) D4(after corr as above) 7 योजयति (for भोज°) D5 स्वाने च (for स्वानेव) —(l 2) Dt1 Dm1 D4 5 7 G3 समीक्ष्यने, Cm g k t °क्षते (as above) Dg1 T G1 3 M3 कृतकार्यान्, Cm g t °र्या (as above), Ck °कृत्या Dt1 द्विजोत्तमान् —(l 3) G1 तत्रेन —(l 4) Ct [ऽ]नुमन्यते D4 5 7 पश्चान्न बहुमन्यते (for the prior half) T1 2 G1 स्वधाम्, Cr m g k as above (for सुधाम्) D4 5 7 इव (for अपि) D4 5 7 सुरोत्तमा, G1 सुरोपमा —(l 5) G3 partly damaged for the prior half D4 5 7 सु- (for [अ]पि) Dt1 Ct वृत्तेषु (for तृप्तेषु) Dd1 Dm1 द्विजोत्तमा, Cm as above (for द्विजर्षभा) Dt1 भुक्तेष द्विजोत्तमा, D4 5 7 पश्चाद्भोज्यास्तु(D5 °श्च) बान्धवा (for the post half) —(l 6) Dd1 Dm1 T1 2 M1 Cg [अ]भ्युपतुम्, M2 [अ]भ्युपेतम्, Cv r m k t as above (for °पेतुम्) D4 5 7 इति ते तत्र मन्यते शृगभग(D5 °भेद)मिवात्मन]

11 ^{b}) D7 भुक्त- D4 5 7 विशेषत, Ck दिशा° (for विशांपते) —^{d}) Dg1 Dt1 Dm1 T2 3 नाव(Dg1 °भि)मन्यते (T3 °से), D7 बहुमस्यते, M3 नाप्यमस्यते, Cm g k t as in text (for नावमस्यते) —For 11, Ś1 D6 subst 1338*, while Ñ2 V1 B D1–3 M4 subst

1340* कथं हि भरतोच्छिष्टा श्रिय स बहुमस्यते ।
ज्येष्ठ श्रेष्ठो वरार्हश्च परभुक्तामिव स्रजम् ।

[V1 om (hapl) l 1 —(l 1) B4 भरतोच्छिन्ना D1–3 M4 न चा(D2 वा)पि भरतोच्छिष्ट(D3 °ष्टिष्ट [sic]) (for the prior half) Ñ2 श्रिय च, D1–3 M4 स राज्य (for श्रिय स) B2 -मन्यते (for -मस्यते) —(l 2) M4 ज्येष्ठ- Ñ2 B वरिष्ठश्च, B3 वरिष्ठा च (for वरार्हश्च) B4 सव (sic), D1 परि- (for पर-) Ñ2 B1 -भुक्तवाम् (sic), V1 -भुक्तम्]

—After 11, Dm1 ins राम, while T2 ins 1341*

12 D4 om 12 —^{a}) G2 M1 नापरेण (for न प°) Dm1 [आ]हृत, D5 7 हृत, T1 हृत, Cm आश्रित (for [आ]हृत) G2 सत्त्व, M1 सस्य, M3 भक्ष (for भक्ष्य) —^{c}) D5 7 T1 2 एतत् (for एव) —G3 damaged from 12^{d} up to हवि in 13^{a} —^{d}) D5 T परिलीढ, D7 °लब्ध (for परलीढ). Dg1 Dt1 Dd1 Dm1 Cg t मन्यसे, T2 मस्यसे —For 12, Ś1 Ñ2 V1 B D1–3 6 M4 subst, while T2 ins after 11

1341* न हि सिंह परालीढनामिष भोक्तुमर्हति ।
नृसिंहो भरतालीढ रामो राज्यं न भोक्ष्यते ।

[(l 1) Ñ2 B3 परानीतम् V1 B1 D1 T2 M4 इच्छति, D2 3 अर्हसि —M4 reads (var) twice l 2 —(l 2) B3 -[आ]नीत, D6 -[आ]रूढ (for -[आ]लीढ) D3 रामो रामो (ditto) T2 भोक्ष्यति M4 (first time) न राज्य भोक्तुमिच्छति]

13 G3 missing up to हवि (cf v l 12) —^{ab}) Ñ2 B2–4 आज्य चरु (B4 रु m), V1 D2 राज्यमाज्य, B1 इध्माज्य च, D1 3–5 7 सर्पिराज्य, M4 आज्य राज्य (for हविराज्य) Ñ2 B1 D2 पुरोडाश, V1 D1 4 5 7 M4 पुरोडाश Ñ2 B1–3 कुशा यूप श्रु(B1 सु)वस्तथा, V1 D1 M4 कुशान्यूप (M4 °पा) स्रुव(D1 श्रुच) तथा, B4 कुशयूपश्रुपास्तथा (sic), D2 कुशान्यूप श्रुवस्तथा, D3 कुशा यूपश्रुचश्रुवा, D4 कुशयूपा स्रुच स्रुवा, D5 कुशान्स्रुव स्रुच तथा, D7 कुशा यूपा श्रुव श्रुच (for ^{b}) Ś1 D6 आज्य तिला समिच्चैव कुशा धू(D6 यू)-पा स्रुचस्तथा —^{c}) V1 नैत यातमानानि (sic) —^{d}) Ś1 Ñ2 B D3 4 6 कल्प(B2 3 °ल्प्य)ते(Ñ2 °ति), D7 कल्पाते (for कुर्वन्ति) V1 D1 2 5 M4 भोक्तुमिच्छति साधव

14 D4 om 14 —^{a}) Dg1 ग्रासम्, G2 3 M1 Ck (before corr as in text) ह्यासम् (for ह्यात्तम्) M3

नैवंविधमसत्कारं राघवो मर्षयिष्यति ।
बलवानिव शार्दूलो वालधेरभिमर्शनम् ॥ १५
स तादृशः सिंहबलो वृषभाक्षो नरर्षभः ।
स्वयमेव हतः पित्रा जलजेनात्मजो यथा ॥ १६
द्विजातिचरितो धर्मः शास्त्रदृष्टः सनातनः ।
यदि ते धर्मनिरते त्वया पुत्रे विवासिते ॥ १७
गतिरेका पतिर्नार्या द्वितीया गतिरात्मजः ।
तृतीया ज्ञातयो राजंश्चतुर्थी नेह विद्यते ॥ १८

कथाव्यासमिद —[b]) G3 सुधाम् (for सुराम्) —For 14[ab], Ś1 Ñ2 V1 B D1-3 5-7 M4 subst

1342* आत्त राज्यमिद पश्चात्तथा भ्रात्रा यवीयसा ।

[Ś1 D6 अतो राज्यम्, V1 D1-3 M4 आत्तमारम्, B4 भुक्त(m also as above) राज्यम्, D5 7 तथा जग्धम् (for आत्त राज्यम्) V1 D1-3 5 7 M4 राज्य (for पश्चात्) V1 D1-3 5 7 भ्रात्रा रामो, M4 रामो भ्रात्रा (for तथा भ्रात्रा) B2 कनीयसा, D5 7 महायशा (for यवीयसा) Ś1 D6 ततो(D6 तथा) भ्रातुर्यवीयम (for the post half)]

—[c]) Ś1 Ñ2 B D6 नाभिपत्तुम्, D5 7 न विभर्तुम् (for °मन्तुम्) T2 न काम तुमुल D5 7 पश्चात् (for रामो) V1 D1-3 M4 नाभिपश्य(V1 M4 °स्य)ति धर्मात्मा —[d]) Ś1 Ñ2 V1 B D1-3 5-7 M4 पीत(V1 D6 7 °त)सोमम्(Ś1 सोम पीतम्) (for नष्टसोमम्) Ś1 V1 D2 6 7 [अ]ध्वरे —After 14, K (ed) ins 1343* and 1344* within brackets

15 G3 damaged for 15[c] —[c]) Dd1 वनवान् (sic) (for बल°) —[d]) M2 3 Cg अवमर्शन, Cr m as in text (for अभि°) —For 15, Ś1 Ñ2 V1 B D1-7 M4 subst, while K (ed) ins after 14 within brackets

1343* न चेमा धर्षणा रामो व्यसहिष्यदमर्षण ।
नाधारयिष्यद्यदि ते गौरव मन्दरोपमम् ।

[(l 1) B3 न च मे, D4 7 न त्विमा, D5 तथेमा, M4 नेमा ते (for न चेमा) Ś1 D6 ह्यमहिष्यद् (for व्य°) V1 D1-3 प्रसहे (K[ed] सगच्छे)दत्यमर्षण, D4 5 7 M4 सहेच्चेदध(D5 °प्र, D7 °ध्य, M4 °भ्य)मर्षण (for the post half) —K(ed) om l 2 —(l 2) Ñ2 न धारयिष्यतिद् (sic), V1 D3-5 7 न धारयेद्दै, B2 नाराधयिष्यद्, B3 4 न धारयिष्यद्, D1 M4 न धारयेच्चेद्, D2 नरधायन् (corrupt) (for नाधारयिष्यद्) B3 (m also as above) इति तद् (for यदि ते) V1 D1-3 M4 मदरादपि, D4 5 7 मदराद्रिवत्]

—Then all the above MSS cont

1344* शितै शरै स हि क्रुद्धो दारयेदपि मन्दरम् ।
त्वा तु नोत्सहते हन्तु धर्मात्मा पितृगौरवात् ।
स सोमार्कग्रहगण नभस्ताराविचित्रितम् ।
पातयेद्यो विभु क्रुद्ध स त्वा न व्यतिवर्तते ।
आचालयेद्वारयेद्वा महीं शैलशताचिताम् । [5]
यस्तेजस्वी स ते पुत्रो गौरवान्नातिवर्तते ।

[Ñ2 om l 1 —(l 1) B4 om, D6 अपि (for स हि) V1 D1-5 7 M4 दार(V1 पार, D4 7 चाल)येन्मदरमपि स हि क्रुद्ध (V1 सहिष्णु[ ]दु) शिलाशत (D4 5 7 M4 शिनै शरै) —(l 2) Ñ2 त्वा नु (for त्वा तु) Ś1 Ñ2 D3 4 6 7 वक्तु (for हन्तु) M4 मदात्मा, K(ed) महात्मा (for धर्मात्मा). —(l 3) V1 -युत (for -गण) D2 -विभूषित (for -विचित्रितम्) —(l 4) D4 7 चालयेद्यो(D4 °द्धा) (for पातयेद्यो) Ś1 D5-7 M4 भुवि क्रुद्ध, V1 [ऽ]भिसक्रुद्ध, D1 3 4 (before corr as in Ś1) भुव क्रुद्ध, K (ed) दिव क्रुद्ध (for विभु क्रुद्ध) B1 3 4 सत्वान्, D7 स त्वा (for स त्वा) B2 न प्रतिवर्तने, D4 7 प्रतिनिवर्तते —D3 reads twice and D6 reads in marg l 5-6 —(l 5) D1 2 5 सतोल्येद्, D3 सशातयेद्, D4 7 आशातयेद्, D6 प्राचाल्येद्, M4 आगालयेद्, K(ed) प्रक्षोभयेद् (for आचालयेद्) Ñ2 V1 B2 4 D1 2 4 M4 दारयेद्, V1 D3 5 6 धारयेद्, D7 वा दारयेद् (for वारयेद्) D1 2 -शिलाचिता, D4 5 7 -ममा° (for -शताचिताम्) —(l 6) V1 D4 7 नाभिवर्तते, D3 illeg (for नाति°) M4 गौरवेणातिवर्तते (for the post half)]

—After 15, Dg1 Dt1 Dd1 Dm1 T G M1-3 ins

1345* नैतस्य सहिता लोका भय कुर्युर्महामृधे ।
अधर्मं त्विह धर्मात्मा लोक धर्मेण योजयेत् ।
नन्वसौ काञ्चनैर्बाणैर्महावीर्यो महाभुज ।
युगान्त इव भूतानि सागरानपि निर्दहेत् ।

[(l 1) T3 कथ (for भय) M3 महाहवे —(l 4) G3 damaged from दहेत् up to सिंह in 16[a]]

16 G3 missing up to सिह in [a] (cf v l 1345*) —[ab]) Dg1 न (for स) Dg1 जनर्षभ (for नर°) Ś1 Ñ2 V1 B D1-7 M4 एव वीर्यो(D4 यो [subm], D7 वै यो) महाग्नस्त्वस्त्वया ख्यात(B3 ज्ञात, D2 °त)पराक्रम —[c]) Ś1 Ñ2 V1 B D1-7 M4 जनयित्वात्मना(Ñ2 B °जस्) त्यक्तो —[d]) D2 लज्जसे न (for जलजेन) V1 D5 7 [आ]त्मनो (for °जो) B4 जलजेवुत्मजो (sic)

17 G1 om 17-19 —For subst (17-19) see 1346* —[a]) Dm1 द्विजातिचलितो —[b]) T1 2 शास्त्रे दृष्ट, Cr m g as in text, Ck °दृष्टे Dt1 Ct शास्त्रे दृष्ट सनातनै —[d]) T2 त्वयि (for त्वया) Dt1 M3 निवासिते, Ct वि°(as in text) ❁ Cm यद्वा • ते धर्मनिरत इत्यत्र अधर्मनिरत इति छेद । शास्त्रदृष्टो द्विजातिचरितो राजर्षिभिराचरित सनातनो धर्मस्ते पुत्रे यदि न स्यात् तर्ह्यधर्मनिरते तस्मिन् त्वया विवासिते युक्त भवेत् । ❁

18 G1 om 18 (cf v l 17) —[b]) G2 आत्मन (for °ज) —[c]) G3 damaged for तृतीया G3 नाश (sic) (for राजंश्) —[d]) Dt1 Dd1 Dm1 T1 नैव (for नेह)

तत्र त्वं चैव मे नास्ति रामश्च वनमाश्रितः ।
न वनं गन्तुमिच्छामि सर्वथा हि हता त्वया ॥ १९
हतं त्वया राज्यमिदं सराष्ट्रं
हतस्तथात्मा सह मन्त्रिभिश्च ।
हता सपुत्रास्मि हताश्च पौराः
सुतश्च भार्या च तव प्रहृष्टौ ॥ २०

